# शुद्धशाङ्करप्रक्रियाभास्करः

## ६–७

परिपोषकाः –

भिषग्रत्नम् बि· वेङ्कटसुब्रह्मण्यशर्माणः,

सद्वैद्यशाला, नंजनगूडु.

अध्यात्मप्रकाशकार्यालयः,

होळेनरसीपुरम्.

# Suddha Shankara Prakriya Bhaskarah

Gentle Reader,

You will have known from the prefatory remarks to the first instalment that the present series of booklets is intended for readers who wish to have an outline of the thoughts contained in the larger work of Swamy Satchidanandendra Saraswati Maharaj, entitled the '*Vedanta Prakriya Pratyabhijna*'. It is, however, complete in itself so far as it goes, and can be used independently.

In the first two instalments of the series, it has been shown that Advaita was the only doctrine of the Upanishads as known to the ancient interpreters of Vedanta before Shankara (and Gaudapada), and that Shankara's own interpretation is based on a hoary tradition which accepts a particular method as the only one employed by all the Upanishads in presenting the final Truth. This method, known as the *adhyaropa-apavada prakriya*, has many special varieties, some of which have been enumerated and explained in the second instalment of this series. All of these uniformly adhere to this one special form of procedure in so far as they deliberately ascribe certain characteristics to Reality, as devices to indicate its presence as one's own self, and finally rescind the ascription.

(*see the inside of the back-cover*)

अध्यात्मग्रन्थावलिः

शुद्धशाङ्करप्रक्रियाभास्करः

तत्र

# ६. शाङ्करप्रस्थानस्य प्रस्थानान्तरेभ्यो वैलक्षण्यम्

# ७. बौद्धमतसाम्यशङ्कापरिहारः

रचयितारः
श्रीसच्चिदानन्देन्द्रसरस्वतीसंयमिनः

क्रमाङ्कः १२७

प्रकाशनस्थानम्
अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.
(हासनजिल्ला, मैसूरुप्रान्तः, दक्षिणरेल्वे.)
१९६४

First Printed 1964
1000 Copies

All rights reserved
by
The Adhyatma Prakasha Karyalaya
Holenarsipur.

(Apply to the Chairman for permission to translate)

*Registered under the Copy Right Act, 1957*

Printed in India
by
Y. Narasappa
at
The Adhyatma Prakasha Press
Holenarsipur

# वेदान्तरसिकेषु विज्ञप्तिः

अयि महाभागाः,

आवेदितमेव प्रथमभागविज्ञप्तौ यथा परस्परविरुद्धप्रस्थानसङ्करदूषितायाम् अद्यतनशाङ्करवेदान्तपठनपाठनपद्धतौ परिष्कारस्य आवश्यकता अस्ति, यदर्थं मया ग्रन्थोऽयमारब्धः प्रकाशयितुं भागशः। तत्र अद्वैतमेव सर्ववेदान्तार्थः, शाङ्करप्रस्थानस्य तु अनितरसाधारणसांप्रदायिकप्रक्रियाविशेषाङ्गीकारनिमित्तमेव सकलेतरवेदान्तप्रस्थानवैलक्षण्यम् – इति प्रथमे भागे प्रतिपादितम्। शाङ्करवेदान्तमर्यादाः, तत्र प्रस्थाने समाश्रीयमाणाया एव प्रक्रियाया सर्ववेदान्तादृतत्वम्, प्रक्रियायाश्च तस्या अवान्तरभेदाश्च कतिपये – इत्येते विषयाः प्रकाशिता द्वितीये भागे ॥

अथास्मिन् तृतीये भागे शाङ्करप्रस्थानस्य प्राचीनप्रस्थानान्तरेभ्यो वैशिष्ट्यम्, तत्र चाधुनातनप्रस्थानान्तरानुयायिभिः, ऐतिहासिकदृष्टिमनुरुन्धानैश्च कैश्चिद् विमर्शकैः, अध्यारोप्यमाणस्य बौद्धमतसाम्यस्य परिहरणं च यथाशक्ति प्रदर्शितम् ॥

अत्रापि भागे प्रमादसञ्जातान्, अक्षराङ्कनदोषान्, भाषादोषान्, विचारसरणिदोषांश्च आविष्कृत्योपकर्तुं संप्रार्थ्यन्ते दोषज्ञाः, येनाहं आधमर्ण्यप्रकटनपूर्वकं तान् द्वितीयसंस्करणे दूरीकर्तुं प्रयतेयेति ॥

अस्यापि भागस्य मुद्रापणप्रकाशनविक्रयादिसर्वव्यवहाराधिकारः होळेनरसीपुरस्थायै अध्यात्मप्रकाशकार्यालयकार्यकारिसमित्यै सर्वथा प्रत्तोऽस्ति नारायणस्मरणपूर्वकमिति

श्रीशङ्करचरणस्मरणावलम्बी

ग्रन्थकर्ता

# अस्फुटसंकेताक्षरविवरणम्

**उपनिषदः तत्तन्नामाद्याक्षरेण सङ्केतिताः, तद्भाष्यं च भा· इति ॥**

| | |
|---|---|
| आ· प· | आलम्बनपरीक्षा दिङ्नागकृता, एन्· अय्यस्वामिशास्त्रिसंपादिता |
| का·, गौ· का· | गौडपादकृता माण्डूक्यकारिका |
| त्रिंशिका | वसुबन्धुकृता |
| प्र· वा· | प्रमाणवार्तिकम् , धर्मकीर्तिकृतम् (Jayasval Institute) |
| बो· च· | बोधिचर्यावतारः शान्तिदेवकृता (Bib. Ind.) |
| म· का·, मा· का· | माध्यमिककारिकाः, नागार्जुनकृता |
| म· का· वृ· | मध्यमक(माध्यमिक)कारिकावृत्तिः, चन्द्रकीर्तिकृता |
| म· वि· | मध्यान्तविभङ्गः, मैत्रेयिनाथकृतः |
| म· वि· सू· भा· | मध्यान्तविभङ्गसूत्रभाष्यटीका, स्थिरमतिकृता |
| विं· | विंशिका, वसुबन्धुकृता (आलम्बनपरीक्षापरिशिष्टभूता) |
| वि· व्या· | विग्रहव्यावर्तिनी, नागार्जुनकृता (Edited by Jayasval and Sankrityayana) |
| श्री भा· | श्रीभाष्यम् , श्रीरामानुजाचार्यकृतम् |
| स· रा· | समाधिराजः ( गिल्गिट् ) |
| सि· त्र· | सिद्धित्रयम् , यामुनाचार्यकृतम् |

—:o:—

॥ ॐ ॥

शुद्धशाङ्करप्रक्रियाभास्करः

# ६. शाङ्करप्रस्थानस्य प्रस्थानान्तरेभ्यो वैलक्षण्यम्

—:o:—

४०. **उत्तरग्रन्थसंबन्धः** – अजाद्वयं ब्रह्मात्मतत्त्वं न शक्यं वाङ्मनसाभ्यां विषयीकृत्य प्रकाशयितुम् । निर्विशेषत्वात् । न चास्ति स्वयंसिद्धस्वप्रकाशरूपस्यास्य सर्वस्याप्यात्मन एव च सतो घटपटाद्यचेतनप्रमेयवत् केनचिन् प्रमाणेन प्रकाश्यत्वाकाङ्क्षा ; अतत्स्वभावाध्यारोपलक्षणाविद्यामात्रव्यवहितत्वात्तु तादृशाविद्यापबाधनमात्रेण तत्स्वरूपसमर्पणात् अस्मिन् प्रमाणत्वेनोपचर्यन्ते वेदान्ताः – इत्येषा वेदान्ताभियुक्तसंमता शाङ्करी प्रक्रिया संग्रहेण प्रदर्शिता ॥

अथाप्यद्वैतमेव वेदान्तार्थमभ्युपगच्छन्तः प्रस्थानान्तरीयाः भाष्यकारसमकालीनाः स्वस्वसंप्रदायबलाद् वेदान्तप्रामाण्यमन्यथैव वर्णयाम्बभूवुः । तत्र समानेऽप्यद्वैतित्वे तेषामनादरणे को हेतुरिति वक्तव्यं यथोपदर्शितप्रक्रियाया एवैकस्या वेदान्ताभिमतत्वबुद्धिदृढीकरणार्थम् । तदर्थोऽयम् आरम्भः ॥

४१. **प्राचीनप्रस्थानभेदानां समाना धर्माः** – तत्र प्रस्थानान्तरावलम्बिभिरपि जगतो ब्रह्मकारणकत्वमुररीक्रियते, मोक्षे जीवानां ब्रह्मभावापत्तिश्च। मोक्षस्तु श्रुतिविहितत्वेन स्वस्वसंप्रदायाभिमत-साधनविशेषेण प्राप्यः–इति तेषामाग्रहः। तथा हि – (१) कर्मकाण्ड-स्यापि वेदत्वसामान्यात् अविशिष्टं प्रामाण्यमिति तत्प्रामाण्याविघाताय कर्मसमुच्चितादेव ज्ञानान्मोक्षो भवितुमर्हति – इति केचित्। (२) वस्तुमात्रसमर्पकस्य ज्ञानस्य अकिञ्चित्करत्वात्, उपासनापराभिधानमेव ज्ञानं वेदान्तविहितम्, तेनैव च मोक्षो भवितुमर्हति। 'आत्मा वा अरे द्रष्टव्यः' (बृ.), 'सोऽन्वेष्टव्यः' (छां.) इत्यादिविधानदर्शनात्; वस्तुबोधकवाक्यानि तु उपास्यस्वरूपसमर्पणेनोपयुक्तानि – इत्यपरे। तेनैवोपासनेन अविद्यानिवृत्तिरपि भवित्री – इत्यपि केचित्। (३) निष्प्रपञ्चब्रह्मात्मभावस्यैव मोक्षत्वात् प्रपञ्चप्रविलये साधको नियुज्यते वेदेन सर्वत्र। तदनुसारेण प्रपञ्चं क्रमक्रमेण प्रविलाप्य मोक्षोऽधिगन्तव्यः –इत्यपरे। (४) ब्रह्मविषयकश्रवणं कृत्वापि कृतार्थता न भवति मुमुक्षोः; अतो वाक्यजन्यं ज्ञानं निरन्तरं दीर्घकालम् अभ्यस्य भावनोपचया-न्निःशेषमज्ञानम् अपनीय कालान्तरे ब्रह्मभावः सम्पादनीयः-इति केचित्। (५) वाक्यजन्यं ज्ञानं केवलं युक्तिसहितं वा समभ्यस्य विशेषज्ञानं संपादनीयम् अज्ञानविध्वस्तये–इत्येके। (६) वाक्यज्ञानस्य संसृष्टार्थ-विषयकत्वात्, असंसृष्टार्थविज्ञानसमुत्पत्तये ज्ञानाभ्यासः कर्तव्य इत्यन्ये। (७) श्रुतिविहितविधानेन अवस्थात्रयवासनानिरोधं कृत्वैव कृतार्थो भवेन्नान्यथा। न हि प्रमाणान्तरगम्यस्यात्मनो वेदान्तैक-

गम्यत्वमिति युज्यते । अतो नात्मज्ञाने वेदान्तानां विनियोगः, किं तर्हि अन्वयव्यतिरेकाभ्याम् अवस्थात्रयाद् विविच्यात्मानं प्रत्यभिज्ञातवान् अवस्थात्रयवासनानिरोधे नियुज्यते – इति केचित् । (८) अथवा मनोनिरोधे एव पुरुषो नियुज्यते ; निरुद्धान्तःकरणस्य स्वयमेवात्मा प्रकाशते, आत्मनः स्वयंप्रकाशत्वादित्यप्यन्ये । (९) साक्षात्कृत-ब्रह्मणोऽपि देहपातानन्तरं ब्रह्मणि लय एवैकान्तिको मोक्षः । तावत्पर्यन्तम् अनात्यन्तिकत्वाद् ब्रह्मप्राप्तेः – इति केचित् । इत्येवं बहुधा विप्रति-पन्नाः प्राचीनप्रस्थानावलम्बिनः ॥

तत्रामीषां सर्वेषामपि वादिनां (१) श्रुतिरपौरुषेयत्वात् प्रमाणान्त-रानधिगतसाधनफलसंबन्धबोधनमुखेनैव प्रमाणम् ; (२) आचार्यस्तु श्रुत्यर्थबोधकत्वमात्रेण मार्गदर्शकः ; (३) साधनविशेषस्तु श्रुतिविहितः, स्वप्रस्थानसंप्रदायबलादेव निर्धारणीयः ; (४) जीवत्वरूपो बन्धो विद्यमान एव तादृशसाधनविशेषानुष्ठानेनैव परिहरणीयः ; (५) अज्ञानमपि क्वचिदभ्युपगम्यमानं पुण्यपापादिवत् शास्त्रैकसमधिगम्यम्, परिहरणीयं च साधनविशेषानुष्ठानेन । (६) स्वस्वसंप्रदायसंमतमीमांसा-प्रकारानुरोधेन वाक्यार्थनिर्धारणम्, तदनुगुणयुक्त्युत्प्रेक्षणं च ; (७) परपक्षनिराकरणेऽपि मीमांसान्यायानामाहरणम्, तार्किकसंमतयुक्त्या-नयनं च समानम् ॥

## प्रस्थानान्तरेषु दोषाः

**४२. वेदान्तानां विधिपरत्वेनाङ्गीकारो दोषः प्रस्थानेषु –** अथामीषां सर्वेषां समानानि दूषणान्युपन्यस्यन्ते तत्प्रक्रियाणाम्

अवैदान्तिकत्वाविष्करणार्थम् । वेदान्तानां नियमेन विधिपरत्वाङ्गीकारस्तावत् समानो दोषः समेषामपि । न हि निर्विशेषात्मतत्त्वप्रतिपादकेषु वेदान्तवाक्येषु विधिसंस्पर्शो नियोगोपदेशगन्धो वा उपलभ्यते क्वचिदपि । वस्तुमात्रपर्यवसायित्वं हि नियमेन दृश्यते सर्वत्र वाक्यानाम्, तद्गतपदानां च । तस्मात्, वस्तुबोधकवाक्यस्यार्थान्तरकल्पनं प्रथमो दोषः सर्वेषां वादिनाम् । यथाहुर्भगवत्पादाः –

(१) न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वये अवगम्यमाने अर्थान्तरकल्पना युक्ता । श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् ॥
सू. भा. १-१-४, पा. ११.

(२) 'तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः' (बृ.) इत्येवमादीनि वाक्यानि निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधानानि – इत्येतत् प्रतिष्ठापितम् 'तत्तु समन्वयात्' (१-१-४) इत्यत्र ॥ सू. भा. ३-२-१४, पा. ३५७.

(३) वस्तुमात्रपर्यवसायीनि हि ब्रह्मवाक्यानि न नियोगोपदेशीनि – इत्येतत् विस्तरेण प्रतिष्ठापितं 'तत्तु समन्वयात्' (१-१-४) इत्यत्र ॥
सू. भा. ३-२-२१, पा. ३६१.

इति च ॥

न्यायश्च – न हि 'तत्त्वमसि' इत्यादिवाक्यबोधितः, 'एकमेवाद्वितीयम्, अपूर्वमनपरमनन्तरमबाह्यं ब्रह्माहम्' इति ज्ञानवान् पुरुषः 'कर्ताहम् वेदविहितसाधनेन पुरुषार्थमवाप्स्ये' इति वा 'वेदवाक्यैर्नियुक्तोऽहं साधनविशेषानुष्ठाने' इति वा मन्येत । वाक्यजनिताकर्तृब्रह्मप्रत्ययविरोधात्, तादृशप्रत्ययस्य ॥

यथाहुर्भाष्यकाराः –

(४) (अन्तःप्रज्ञत्वादि) प्रतिषेधविज्ञानप्रमाणसमकालमेव आत्मन्यनर्थप्रपञ्चनिवृत्तिलक्षणफलं परिसमाप्तम् इति तुरीयाधिगमे प्रमाणान्तरं साधनान्तरं वा न मृग्यम् ॥ मां. भा पा. १८६.

(५) नियुक्तस्य च 'अस्मिन् अधिकृतोऽहम्, कर्ता, मयेदं कर्तव्यम्' इत्यवश्यं ब्रह्मप्रत्ययाद् विपरीतप्रत्यय उत्पद्यते ॥

सू. भा. ४-१-२, पा. ४६३.

इति ॥

४३. शारीरकारम्भानुपपत्तिर्द्वितीयो दोषः – वेदान्तवाक्यमीमांसाशास्त्रस्य पृथगारम्भणानुपपत्तिः सर्वत्रापि तत्र समाना। सर्वैरपि ह्येतैर्वादिभिः, ज्ञानकाण्डस्यापि विधिपरत्वेनैवाङ्गीकारात्, विधिविचारस्य च 'अथातो धर्मजिज्ञासा' इति जैमिनिनैवारब्धत्वात् न पुनरपि 'अथातो ब्रह्मजिज्ञासा' इति पृथक् शास्त्रारम्भस्यावकाशोऽस्ति। आरब्धं तु शास्त्रं भगवता बादरायणेन। तदन्यथानुपपत्त्या अवगम्यते न विधिशेषत्वं ब्रह्मण इष्टमाचार्यस्येति ॥

प्रतिपत्तिविधिपरत्वे हि 'अथातो धर्मजिज्ञासा' इत्येवारब्धत्वात् न पृथक् शास्त्रमारभ्येत। आरभ्यमाणं चैवमारभ्येत 'अथातः परिशिष्टधर्मजिज्ञासा' इति। 'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' इतिवत् ॥

सू. भा. १-१-४, पा. २३.

इति ॥

४४. आचार्योपगमोपदेशानुपपत्तिर्दोषान्तरम् – कर्मविषये इवेहापि विध्याकाङ्क्षैव चेत् स्यात् तर्हि नाचार्योपगमोऽप्राप्त इवोपदेष्टव्यः, अवधारयितव्यो वा 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्'

(मुं. १-२-१२) इति । तस्मादवगम्यते न ब्रह्मात्मैकत्वोपदेशवाक्यानां ज्ञानविध्याकाङ्क्षा–इति । तदुक्तं भाष्ये –

**यदि हि सदस्मीति बुद्धिमात्रं कर्तव्यतया विधीयते न तु स्वंशब्दवाच्यस्य सद्रूपत्वमेव, तदा नाचार्यवान् वेदेति ज्ञानोपायोपदेशो वाच्यः स्यात् । यथा 'अग्निहोत्रं जुहुयात्' इत्येवमादिषु अर्थप्राप्तमेवाचार्यवत्त्वमिति तद्वत् ॥**

**छां. भा. ६-१६, उपसंहारभाष्यम्, पा. ५४०.**

[तुल्यन्यायात, ज्ञानकाण्डे यत्किञ्चिद्विधीयत इति नियमम् आस्थितवत्सु सर्वेष्वपि प्रस्थानेषु एष दोषः प्रसजति ॥ ]

**४५. मोक्षस्य साधनायत्तत्वकल्पनम् अपरो दोषः –** मोक्षस्य साधनानुष्ठानेन प्राप्यत्वाभ्युपगमोऽपरो दोषः सर्वेषामेषाम् । तथा हि जीवत्वनिवृत्तिरेव चेन्मोक्षः, जीवत्वं च इदानीं विद्यमानं कर्तृत्वादिलक्षणम्, न तर्हि स्वभावभूतं तत् साधनानुष्ठानेन निवर्त्येत इति वक्तुं युक्तम् । मोक्षश्च निगडभङ्ग इवाभावरूप एव स्यात् । परमात्मैकत्वरूपत्वे तु तस्य नित्यत्वात् न साधनापेक्षा । साधनायत्तत्वे चानित्यत्वप्रसङ्ग इति । उक्तं च भाष्ये –

**(१) न चानभ्युपगम्यमाने ज्ञानगम्ये ब्रह्मात्मत्वे कर्तृत्वभोक्तृत्वस्वभावस्यात्मनः कैवल्यमाकाङ्क्षितुं शक्यम् । अग्न्यौष्ण्यवत् स्वभावस्य अपरिहार्यत्वात् ॥ सू. भा. ४-३-१४, पा. ५००.**

**(२) न च निगडभङ्ग इवाभावभूतो मोक्षो बन्धननिवृत्तिरुपपद्यते । परमात्मैकत्वाभ्युपगमात् 'एकमेवाद्वितीयम्' इति श्रुतेः ॥**

**बृ. भा. ४-४-६, पा. ९१८.**

**४६. विद्यमानाविद्यानिवृत्तिरेव मोक्ष इत्यपि न सम्यक्**–यद्यपि प्रस्थानान्तरीयाः केचिद् विद्यमानबन्धनिवृत्तिलक्षणं मोक्षं नेच्छन्ति । अविद्यानिवृत्तिमेव तु मोक्षत्वेनाभ्युपयन्ति, तथापि तेऽपि यथोक्ताद्दोषान्नैव मुच्यन्ते । यतस्तेषामेकदेशिनो ज्ञानस्यापि विधिमुपगच्छन्ति । तत्साध्यं च मोक्षम् । तच्चोभयमयुक्तमेव । यदाहुर्भाष्यकाराः –

(१) अविधिलक्षणत्वाद् विद्यायाः, असाध्यत्वाच्च विद्याफलस्य ॥

सू. भा. ३-४-३३, पा. ४४९.

इति ॥

न च प्रतिबन्धापनयनमात्रेण सिद्धस्यैव मोक्षस्याभिव्यक्तिरित्यभ्युपगमे नोक्तदोषप्रसक्तिः ; प्रतिबन्धापनयनार्थं साधनस्याप्यनुष्ठेयत्वोपपत्तिः–इति शङ्कनीयम् । प्रतिबन्धो हि विद्यमान एव चेदपनेयः, दोषतादवस्थ्यम् । न हि विद्यमानस्य विनाशः संभवी । न चानित्यस्य विद्यमानस्याप्यपनयः स्यादेवेति वाच्यम् । यतोऽनित्यस्वभावश्चेत् प्रतिबन्धः स्वयमेव विनङ्क्ष्यति, तत्र का साधनापेक्षा ? किञ्च विद्यमानानां सस्यादीनां विनष्टानामपि पुनःपुनरुत्पत्तिदर्शनात्, अविद्यादिप्रतिबन्धानां हेतुं विनैवोत्पन्नानां पुनरुत्पत्तिरपि शक्यशङ्का । अविद्याया अनादित्वान्नोक्तदोषः – इति चेत् । तदपि न शुध्यति । आत्मनोऽवस्थाभेदाभ्युपगमे तस्यानित्यत्वप्रसङ्गात्, बन्धमोक्षकल्पनायाः प्रमाणविरुद्धत्वाच्च । यदुक्तं गीताभाष्ये –

(२) आत्मनोऽवस्थाभेदानुपपत्तेः । यदि तावदात्मनो बन्धमुक्तावस्थे(ते ?), युगपत् स्यातां क्रमेण वा । युगपत् तावद् विरोधान्न

संभवतः । स्थितिगती इवैकस्मिन् । क्रमभावित्वे च निर्निमित्तत्वं सनिमित्तत्वं वा । निर्निमित्तत्वे अनिर्मोक्षप्रसङ्गः, अन्यनिमित्तत्वे च स्वतोऽभावात् अपरमार्थत्वप्रसङ्गः । तथा च सति अभ्युपगमहानिः । किञ्च बन्धमुक्तावस्थयोः पौर्वापर्यनिरूपणायां बन्धावस्था पूर्वं प्रकल्प्या, अनादिमती अन्तवती च ; तच्च प्रमाणविरुद्धम् । तथा मोक्षावस्था आदिमती अनन्ता च प्रमाणविरुद्धैव अभ्युपगम्यते । न च, अवस्थावतः, अवस्थान्तरं गच्छतो नित्यत्वम् उपपादयितुं शक्यम् ॥

गी. भा. १३-२, पा. १९३.

इति ॥

अपि चाभिव्यक्तिपक्षोऽयं बृहदारण्यकभाष्ये बहुधा विकल्प्य दूषितः । तदपि दूषणमिहानुसंधेयम् –

(३) येऽप्याचक्षते मोक्षे विज्ञानान्तरम् आनन्दान्तरं चाभिव्यज्यत इति । तैर्वक्तव्योऽभिव्यक्तिशब्दार्थः । यदि तावल्लौकिक्येव उपलब्धिविषयप्राप्तिरभिव्यक्तिशब्दार्थः, ततो वक्तव्यम्-किं विद्यमानमभिव्यज्यते, अविद्यमानमिति वा । विद्यमानं चेत् यस्य मुक्तस्य तदभिव्यज्यते, तस्य आत्मभूतमेव तदिति उपलब्धिव्यवधानानुपपत्तेर्नित्याभिव्यक्तत्वात् मुक्तस्याभिव्यज्यत इति विशेषवचनमनर्थकम् । अथ कदाचिदेवाभिव्यज्यते, उपलब्धिव्यवधानादनात्मभूतं तदिति अन्यतोऽभिव्यक्तिप्रसङ्गः, तथा चाभिव्यक्तिसाधनापेक्षता । उपलब्धिसमानाश्रयत्वे तु व्यवधानकल्पनानुपपत्तेः सर्वदा अभिव्यक्तिः, अनभिव्यक्तिर्वा ; न त्वन्तरालकल्पनायां प्रमाणमस्ति । न च समानाश्रयाणाम् एकस्यात्मभूतानां धर्माणाम् इतरेतरविषयविषयित्वं संभवति । विज्ञानसुखयोश्च प्रागभिव्यक्तेः संसारित्वम् अभिव्यक्त्युत्तरकालं च मुक्तत्वं यस्य, सोऽन्यः परस्मान्नित्याभिव्यक्तज्ञानस्वरूपात् । अत्यन्तवैलक्षण्यात् शैत्यमिवौष्ण्यात् । परमात्मभेदकल्पनायां च वैदिकः कृतान्तः परित्यक्तः स्यात् ॥ बृ. भा. ४-४-६, पा. ९१८-९१९.

**४७. श्रुतिप्रामाण्यमाश्रित्य दोषदूरीकरणं न शक्यम् –** श्रुतिवाक्यप्रामाण्यात् सर्वमिदमचोद्यम्–इति प्रत्यवस्थानं तु सर्वेषामपि श्रुतिप्रमाणकानां समानम् । तत्र श्रुत्यर्थ एव तावत् किंमतानुकूलः ? –इति निर्धारणीयं भवति । न हि व्याख्यानकौशलप्रदर्शनमात्रेण वेदार्थो निश्चितो भवति । व्याख्यानान्तरस्य प्रतिवादिनोऽपि सुलभत्वात् । न च विरुद्धोऽप्यर्थः श्रुत्यर्थ इत्यवगन्तुं शक्यम् । न हि प्रमाणभूता श्रुतिरपि प्रमाणान्तरविरुद्धमर्थं स्ववचनविरुद्धं वा विवक्षति कदाचित् । यथोक्तम् –

> न हि श्रुतिशतमपि 'शीतोऽग्निः', 'अप्रकाशो वा' इति ब्रुवत् प्रामाण्यमुपैति । यदि ब्रूयात् शीतोऽग्निः, अप्रकाशो वा–इति ; तथापि अर्थान्तरं श्रुतेर्विवक्षितं कल्प्यम्, प्रामाण्यान्यथानुपपत्तेः । न तु प्रमाणान्तरविरुद्धम्, स्ववचनविरुद्धं वा ॥ गी भा. १८-६६, पा. २९५

इति ॥

**४८. विवादग्रस्ततर्कोपन्यासोऽपि सर्वत्र समानो दोषः –** एवं स्वस्वपक्षानुगुणतर्कोपन्यासोऽपि समानो मन्तव्यः । न हि प्रस्थानान्तरावलम्बी प्रतिवादी स्वपक्षानुगुणं तर्कमुपन्यस्य अयमेव युक्तियुक्तो वेदान्तसिद्धान्तः–इति प्रतिपादयितुम्, प्रतिपक्षप्रतिष्ठापितं व्युत्थापयितुं च न शक्नुयादिति संभावना अस्ति । न चायमेव निरपवादस्तर्क इति सर्वे परिगृह्णीयुरिति प्रत्याशा समस्ति । यदप्युक्तं भाष्ये –

> यद्धि केनचित्तार्किकेण इदमेव सम्यग्ज्ञानमिति प्रतिपादितम्, तदपरेण व्युत्थाप्यते, तेनापि प्रतिष्ठापितं ततोऽपरेण व्युत्थाप्यत इति प्रसिद्धं लोके ॥ सू. भा. २ १-११, पा. १९४.

2

न च मीमांसान्यायावष्टम्भेन श्रुत्युपपत्तिभ्यां वेदान्तार्थं निर्णेतुं समर्थानां संप्रदायविदां महाप्रज्ञानाम् अप्रतिष्ठिततर्कमात्रशरणैस्तौल्यापादनं न युक्तमिति प्रत्यवस्थेयम् । मीमांसादिसर्वपरिकरोपेतमेव स्वस्वसंप्रदायसंमतं सिद्धान्तं बहुमन्यमानानां वेदान्तिनां नानापथजुषां मध्ये को ब्रह्मिष्ठः, कश्च तर्कविदामुत्तमः–इति निश्चये हेतोरेवाद्य विचार्यमाणत्वात् ; तस्याद्याप्यनिश्चयादिति ॥

४९. **सिद्धान्ते श्रुतितर्कयोरनुभवानुगुणत्वं विशेषः –** भवत्वेवं प्रस्थानान्तराणां सर्वेषामपि सदोषत्वमिति । तथापि भगवत्पादसंप्रदायगतस्य वेदान्तप्रस्थानस्य को विशेषो येन तदेव परिगृह्येतेति ? अत्र ब्रूमः । स्मर्यतां पूर्वकिरणेषु यथावर्णिता सांप्रदायिकी प्रक्रिया । नैवेह प्रतिज्ञामात्रेणाद्वैतमुररीक्रियते । न च वाक्यमित्येव श्रुतिप्रमाणं श्रद्धेयतया समुपन्यस्य केवलमीमांसान्यायावलम्बनेन व्याख्यानचातुरीप्रदर्शनमात्रेण स्वसिद्धान्तः प्रतिष्ठाप्यते, केवलतर्कावष्टम्भेन वा परपक्षनिराकरणपूर्वकं स्वपक्षः प्रतितिष्ठापयिष्यते ; किं तु सार्वत्रिकानुभवाधारेणैव श्रुत्यर्थनिर्णयः क्रियते अपरिहाय मीमांसातर्कसाहाय्यमपि । तदेतत् प्रतिज्ञातं भाष्येऽपि –

(१) वेदस्य तु नित्यत्वे विज्ञानोत्पत्तिहेतुत्वे च सति व्यवस्थितार्थविषयत्वोपपत्तेः, तज्जनितस्य ज्ञानस्य सम्यक्त्वम् अतीतानागतवर्तमानैः सर्वैरपि तार्किकैरपह्नोतुमशक्यम् । अतः सिद्धमस्यैवौपनिषदस्य ज्ञानस्य सम्यग्ज्ञानत्वम् । अतोऽन्यत्र सम्यग्ज्ञानत्वानुपपत्तेः संसाराविमोक्ष एव प्रसज्येत ॥ सू. भा. २–१–११, पा. १९४.

[अत्र 'नित्यत्वे' इति न प्रामाण्ये कारणमुच्यते, किं तु तार्किकमतिवदनेकरूपत्वानेकार्थत्वाभावः । न हि वेदनित्यत्वं शारीरके हेतुभिः प्रतिष्ठाप्यते, पूर्वतन्त्रे स्थितमेव तु व्यावहारिकनित्यत्वमनूमोद्यते इति स्पष्टम् 'अत एव च नित्यत्वम्' (वे. सू. १-३-२९) इति सूत्रस्य भाष्ये । 'विज्ञानहेतुत्वे' इति सार्वत्रिकानुभवहेतुत्वेन प्रामाण्यं द्योत्यते ॥ ]

**(२) न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम्, किं तु श्रुत्यादयोऽनुभवादयश्च यथासंभवमिह प्रमाणम् । अनुभवावसानत्वात्, भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य ॥**

**सू. भा. १-१-२, पा. ८.**

[ 'यथासंभवम्' इत्युक्त्या उपासनारूपमानसकर्मविषये केवलश्रुत्यादिवाक्यप्रामाण्यमेवाङ्गीक्रियते इत्यविरोधो ज्ञापितः ॥ ]

## ५०. वेदान्तानां निर्विशेषवस्तुपरत्वाङ्गीकारो विशेषोऽत्र–

वेदान्तवाक्यानां न कर्मवाक्यवन्नियमेन क्रियार्थत्वमुररीक्रियतेऽत्र, किं तु अद्वितीयब्रह्मावगमकत्वमेव प्राधान्यतः । तेन वस्तुबोधकवाक्यानाम् उपासनाविधायकवाक्यानां च तत्तत्प्रधानत्वेन पृथक्करणात्, न वाक्यस्यार्थान्तरकरणलक्षणो दोषोऽत्र । तथा हि भाष्यकारः –

**(१) देवतादिप्रतिपादनस्य तु स्ववाक्यगतोपासनार्थत्वेऽपि न कश्चिद् विरोधः । न तु तथा ब्रह्मण उपासनाविधिशेषत्वं संभवति । एकत्वे हेयोपादेयशून्यतया क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः ॥**

**सू. भा. १-१-४, पा. ११.**

[' क्रियाकारकादिद्वैतविज्ञानोपमर्दोपपत्तेः ' इति न सर्वेषां वेदान्तवाक्यानां विधिपरत्वं प्रत्याख्यातमत्र, किं तु ब्रह्मवाक्यानामेव ॥ ]

**(२) ' तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः ' इत्येवमादीनि वाक्यानि निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि**

नार्थान्तरप्रधानानि – इत्येतत् प्रतिष्ठापितं 'तत्तु समन्वयात्' इत्यत्र ॥
सू. भा. ३-२-१४, पा. ३५७.

(३) वस्तुमात्रपर्यवसायीनि हि ब्रह्मवाक्यानि न नियोगोपदेशीनि इत्येतद् विस्तरेण प्रतिष्ठापितं 'तत्तु समन्वयात्' इत्यत्र ॥
सू. भा. ३-२-२१, पा. ३६१.

(४) सति तु विरोधे तत्प्रधानानि अतत्प्रधानेभ्यो बलीयांसि भवन्ति ॥ सू. भा. ३-२-१४, पा. ३५७.

[वेदान्ताः सविशेषब्रह्मपराः, उत निर्विशेषब्रह्मपराः ? – इत्यत्रैव विधिपराः, वस्तुपरा वा ? – इत्यत्रापि तत्प्रधानवाक्यानां बलीयस्त्वमेव विनिगमकं वाक्यार्थनिर्णये – इत्यभ्युपगमोऽत्र सूचितः ॥ ]

वेदान्तानां निर्विशेषवस्तुपरत्वाङ्गीकारेण न केवलं तत्तत्परवाक्यानामर्थान्तरकल्पनदोषवारणम्, अपि तु शारीरकशास्त्रारम्भानुपपत्तिः, आचार्योपगमोपदेशानुपपत्तिः – इत्येतावपि दोषौ नात्र प्रसजतः –इति स्पष्टम् । उपदेशमात्रगम्यत्वात् परमात्मवस्तुनः, तदर्थं शास्त्रारम्भः, गुरूपसर्पणोपदेशश्चेत्युपपत्तेः । तथा हि भाष्यम् –

(५) अ) तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादेव अवगम्यते । कथम् ? समन्वयात् ॥
सू. भा. १-१-४, पा. ११.

[ब्रह्म शास्त्रादेवावगम्यते–इत्यत्र परमं तात्पर्यम् । न तु वस्तुवृत्तेन कारणमेव ब्रह्म इत्यत्रापीति प्रकृतसूत्रभाष्यादेवावगम्यते ॥ ]

(आ) स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकं वेदान्तवाक्यसमन्वयात् इति सिद्धम् । एवं च सति 'अथातो ब्रह्मजिज्ञासा' इति तद्विषयः पृथक्शास्त्रारम्भः उपपद्यते ॥ सू. भा. १-१-४, पा. २३.

(६) ये सम्यग्दर्शिनः, तैरुपदिष्टं ज्ञानं कार्यक्षमं भवति नेतरत् इति भगवतो मतम् । तथा च सतीदमपि (गी. ४-३५) समर्थं वचनम् -

[अत्र हि पञ्चत्रिंशश्लोके 'यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि' इत्याचार्योपदिष्टज्ञानेनैव मोहापसरणं भवतीत्युच्यते ॥ ]

(७) कथञ्चिदेव पुण्यातिशयात् परमकारुणिकं कञ्चित् मद्ब्रह्मात्म-विदं विमुक्तबन्धनं ब्रह्मिष्ठं यदा आसादयति, तेन च ब्रह्मविदा कारुण्यात् दर्शितसंसारविषयदोषदर्शनमार्गो विरक्तः संसारविषयेभ्यः, 'नासि त्वं संसारी अमुष्यपुत्रत्वादिधर्मवान्, किं तर्हि सद् यत् तत् त्वमसि' इत्यविद्यामोहपटाभिनहनान्मोक्षितो गन्धारपुरुषवच्च स्वं सदात्मानम् उपसंपद्य सुखी निर्वृतः स्यात्-इत्येतमेवार्थमाह 'आचार्यवान् पुरुषो वेद' इति ॥ छां. भा. ६-१४-२, पा. ५३५.

इति ॥

५१. अत्र विद्यमानबन्धनिवृत्तिर्नाङ्गीक्रियते - वस्तुत एव विद्यमानस्य बन्धस्य, अविद्याया वा, साधनानुष्ठानेन वास्तविकी निवृत्तिरित्यनभ्युपगमात्, शास्त्राचार्योपदेशजनितविद्यया अविद्या-ध्यारोपितबन्धादेरपबाधमात्रमित्यङ्गीकाराच्च, प्रस्थानान्तरेषु चोदित-दोषाणाम् अत्रानवकाशः -

(१) न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ गौ. का. २-३२.

भाष्यम् - अतो मनोविकल्पनामात्रं द्वैतमिति सिद्धम् । तस्मात् सूक्तं द्वैतस्य असत्त्वात् निरोधाद्यभावः परमार्थतेति ॥ पा. २०४.

[अत्र द्वैतप्रपञ्चस्य विकल्पमात्रत्वात्, न तस्य निवृत्त्यर्थम् अनुष्ठेयं साधनमपेक्षितव्यम् इत्युक्तम् । अतो विद्यमानस्य निवृत्तिः, अविद्यमानस्यो-त्पत्तिर्वा नाङ्गीकृता भवति ॥ ]

(२) अविद्यावतः, अविद्यानिवृत्त्यनिवृत्तिकृतो विशेष आत्मनः स्यात् -इति चेन्न । अविद्याकल्पनाविषयत्वाभ्युपगमात् रज्जूषरशुक्तिकागगनानां सर्पोदकरजतमलिनत्वादिवददोष इत्यवोचाम । तिमिरातिमिरदृष्टिवत् अविद्याकर्तृत्वाकर्तृत्वकृत आत्मनो विशेषः स्यादिति चेन्न । 'ध्यायतीव लेलायतीव' इति स्वतोऽविद्याकर्तृत्वस्य प्रतिषिद्धत्वात् ॥

बृ. भा. ४-४-६, पा. ९१९.

[अत्र अविद्याश्रयत्वमपि अविद्याकल्पितमेवेति, अविद्यानिवृत्त्यनिवृत्ती अपि अविद्याकल्पिते एवेति चोक्तम् । तेन प्रस्थानान्तरे उद्भाविता दोषा नात्र प्रादुःष्युः ॥ ]

(३) 'अहं न जाने मुग्धोऽस्मि' इति प्रत्ययदर्शनात् अविद्याभ्रमवत्त्वमेव इति चेत् । न । तस्यापि विवेकग्रहणात् । न हि यो यस्य विवेकेन ग्रहीता स तस्मिन् भ्रान्त इत्युच्यते ॥

बृ. भा. ४-४-६, पा. ९१९.

[अनेन अनुभवविरोधः परास्तः ॥ ]

५२. **दृष्टिद्वयाङ्गीकारेण सर्वदोषपरिहारः** – तदेवमत्र प्रस्थाने, **अविद्याकल्पितव्यवहारदृष्ट्यैव** प्रपञ्चसद्भावः, जीवानां प्रमातृत्वकर्तृत्वभोक्तृत्वलक्षणः संसारः, उपास्योपासकादिभेदः, शास्त्राचार्यवाक्यप्रामाण्यम्, ज्ञानसाधनानुष्ठानम्, ज्ञानेनाज्ञाननिवृत्तिः, बन्धमोक्षौ च–इत्येवमादयः सर्वे व्यवहारा अभ्युपगम्यन्ते । **परमार्थदृष्ट्या** तु नैवास्ति किञ्चिन् निर्विशेषब्रह्मव्यतिरिक्तम्–इत्यभ्युपगमात्, अभ्युपगमस्य चास्य श्रुतियुक्त्यनुभवसङ्ग्ज्ञानेनोपपादनाच्च न कश्चिदस्ति वेदान्तार्थोऽसाधितः, न कश्चिद्दोषोऽस्त्यपरिहृतः । अत एवात्र श्रुतिस्मृतिपुराणानां यथासंभवं प्रामाण्यम् उररीकृत्य मीमांसान्यायाधारेण

वाक्यार्थनिर्णयः, विनेयान् प्रति तत्तदधिकारानुगुणं शास्त्रतर्कादानेन श्रुतियुक्त्यनुभवसज्ञानप्रदर्शकवादकथासरण्या उपदेशः, पराभिमत-प्रस्थानान्तराणाम् असारत्वप्रख्यापनेन मुमुक्षूणां ततो विमुखीकरणाय यथायोगं जल्पवितण्डादिकथा अप्याश्रित्य प्रयतनं च–इत्येतत् सर्वमव-कल्पते ; प्रस्थानान्तरेषु तु नैवम्–इति सुमहद् वैलक्षण्यम् । तथा ह्यभियुक्ताः –

(१) यदा वितथं द्वैतम्, आत्मैवैकः परमार्थतः सन्, तदा इदं निष्पन्नं भवति – सर्वोऽयं लौकिको वैदिकश्च व्यवहारोऽविद्याविषय एवेति ॥ गौ· का· भा· २–३२; २०४.

(२) स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम् ।
परस्परं विरुध्यन्ते तैरयं न विरुध्यते ॥ गौ का· ३–१७.
अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते ।
तेषामुभयथा द्वैतं तेनायं न विरुध्यते ॥ गौ· का· ३–१८.

[ तद्भेदः – तस्य कार्यम्, तस्मिन् विकल्पितम् इत्यर्थः ॥ ]

(३) अजातस्यैव भावस्य जातिमिच्छन्ति वादिनः ।
अजातो ह्यमृतो भावो मर्त्यतां कथमेष्यति ॥ गौ· का· ३–२०.
न भवत्यमृतं मर्त्यं न मर्त्यममृतं तथा ।
प्रकृतेरन्यथाभावो न कथञ्चिद् भविष्यति ॥ गौ· का· ३–२१.

[अत्र वस्तुत एवोत्पत्तिबन्धमोक्षादीन् इच्छन्तो वेदान्तिनो दूषिताः॥]

एवं च सर्वथापि बन्धम् अविद्यां वा, विद्यमानत्वेन प्रकल्प्य श्रुतिप्रमाणविहितसाधनविशेषादेव मुक्तिमिच्छतां, पक्षप्रतिपक्षग्रहणेन परस्परं विवदमानानां प्रस्थानस्य कस्यचिदपि कथञ्चिदपि साम्यं

चिन्तयितुमपि न शक्यं भगवत्पादीयसांप्रदायिकप्रस्थानेन । न ह्यत्र क्वचिदपि बन्धः, अविद्या वा, कण्टकादिवदुत्कीलयापनेतव्यत्वेन प्रदर्श्यते । सर्वत्रैव तु 'अध्यारोपापवादन्यायेन' नित्यसिद्धनिष्प्रपञ्चतत्वप्रपनमेव लक्ष्यीक्रियते इति सर्वं शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादश्रीमच्छङ्करभगवच्चरणस्मरण-परिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्यसच्चिदानन्देन्द्र-सरस्वत्याख्येन भिक्षुणा प्रणीते शुद्धशाङ्करप्रक्रियाभास्कराभिधे प्रकरणे **शाङ्करप्रस्थानस्य प्रस्थानान्तरेभ्यो वैलक्षण्यम् नाम षष्ठः किरणः**

## ७. बौद्धमतसाम्यशङ्कापरिहारः

—:o:—

५३. शङ्का – अत्र केचिद् ब्रूयुः–अस्त्वेवं शङ्करभगवत्पादानां प्रस्थानस्य सांप्रदायिकत्वम्, अस्तु च तदन्येषां शङ्करभाष्येषु परीक्षितानां प्रस्थानान्तराणां सदोषत्वमिति । तथापि, एतत्संप्रदायोररीकृतैवैका वेदान्तप्रक्रियेति अनादिकालादपि सर्वसंप्रतिपन्नमासीदिति कथं विश्वसिमः ? न हि शाङ्करभाष्येषु विमर्शनायानुपात्तानि प्रस्थानान्तराणि नासन्नेवानादिकालस्रोतसि अद्याप्यनुपलब्धानि–इति शक्यते संभावयितुम् इति ॥

स्यादेतत् । दर्शितं तावत् शाङ्कर्याः प्रक्रियायाः सर्ववेदान्तानुगन्तृत्वम्; दर्शितं च सार्वत्रिकानुभवानुसारेण सर्वेषामपि वेदान्तानाम् अद्वैतात्मनि तात्पर्यं तयैव समाश्रितया शक्यनिर्धारणं नान्यथा–इति । तत्रैवम् अवधारिते वेदान्तार्थे, कुतः पुनरनुपलब्धप्रस्थानान्तरसद्भावसंभावनामात्रेण आक्षेपोत्थापनस्यावकाश इति ? अत्रोच्यते । भवेदेतदेवं यदि नियमेन सर्वसंप्रतिपन्नं स्यात् शङ्करसंप्रदाय एव प्रवृत्तोऽनादिकालात्, नान्य इति । अस्तित्वाक्षेपः प्रस्थानान्तरीयाणां भाष्यकाराणां यत्रेदं गौडपादाद्यैः प्रस्थापितं वेदान्तमतम्, किं तर्हि सौगतप्रच्छर्दितमेवेति । तथा हि –

(१) 'विगीतं विच्छिन्नमूलं माहायानिकबौद्धगाथितं मायावादं व्यावर्णयन्तो लोकान् व्यामोहयन्ति'

इति (भा. सू. भा. १-४-२५) सूत्रभाष्ये भास्कराचार्याः ॥

(२) अनाद्यविद्यावशाच्च समारोपितावास्तवग्राह्यग्राहकविकल्पोल्लेखिनी स्वयंप्रकाशा संविदेव परमार्थसती, सैव आत्मा-इति सौगताः प्रकटाः प्रच्छन्नाश्च ॥ सि. त्र., पा. १९.

प्रत्युक्तश्चायं प्रतिबिम्बवादः प्रच्छन्नबाह्यमतप्रत्यादेशे ॥

सि. त्र., पा. ४०.

इति च यामुनाचार्याः ॥

(३) ज्ञानमात्रमेव परमार्थ इति साधयन्तः सर्वलोकोपहासोपकरणं भवन्तीति वेदबादच्छद्मप्रच्छन्नबौद्धनिराकरणे निपुणतरं प्रपञ्चितम् ॥

श्री. भा. २-२-२७, पा. १०१.

इति रामानुजाचार्याः ॥

(४) यच्छून्यवादिनः शून्यं तदेव ब्रह्म मायिनः ।
न हि लक्षणभेदोऽस्ति निर्विशेषत्वतस्तयोः ॥ २४०

इति (वे. सू. २-२-८-२८) शून्याधिकरणे आनन्दतीर्थाः ॥

अधुनातनाङ्ग्लशिक्षणसंस्कृतबुद्धयश्च ग्रन्थतत्त्वसंशोधकाः इत्थमवयन्ति -

(अ) गौडपादग्रन्थे योगाचाराभिख्यविज्ञानवाद्यभिमतैव 'विज्ञप्तिमात्रता' नाम चित्तावस्था नामान्तरेण स्वीकृता -

Agama Sastra, Intro. pp. cxxxii onwards.

इति विधुशेखरभट्टाचार्याः ॥

(आ) अद्वैतिनां परमार्थव्यवहारदृष्टिविभागस्वीकरणं माध्यमिकानां

संवृतिपरमार्थसत्यविभागसरणिम् अनुहरति । नागार्जुनशिष्टं शून्यं शङ्कराचार्योपदिष्टं निर्गुणं ब्रह्म च भूयशः समानधर्मके –

Indian Philosophy, Vol. I, p. 608

इति प्रोफेसर् राधाकृष्णन् महोदयः ॥

(इ) गौडपादाचार्याः सम्भवतः स्वयमपि सौगता एव स्युः । ते च औपनिषददर्शनं हि सौगतदर्शनेन साम्यं धत्ते इत्यनुमन्वते ॥

History of Indian Philosophy, Vol. I, p. 423

इति दासगुप्तमहाशयः ॥

तदेतेषामपि मतेन शाङ्करसंप्रदायो नानादिकालप्रवृत्तः ॥

तद् यावद् बौद्धवेदान्तदर्शनयोः परस्परवैलक्षण्यप्रदर्शनपूर्वकमुक्तशङ्का न निवार्यते, तावदतीतकिरणेषु प्रतिपादितमपि भगवत्पादप्रस्थानस्य सर्ववेदान्तसंमतप्रक्रियावत्त्वं न सुप्रतिष्ठं भवेत् । अतः पुनराक्षेपः क्रियते 'कथं श्रद्दध्याम इयमेव प्रक्रिया वेदान्तसंप्रदायगता इति ?' इति ॥

५४. वेदान्तप्रस्थाने सौगतमतगन्धिताशङ्का – अत्र गौडपादास्तावत् स्वीयप्रक्रियायां कथं विज्ञानवादशून्यवादसंमतानभिप्रायान् वेदान्तवादत्वेनाभिनीय दर्शयन्ति ? – इत्येतद् पूर्वपक्षिमतेन किञ्चिदुपप्रदर्श्यते । प्रथमं तावन्माध्यमिकमताभिनयः –

(१) अनिरोधमनुत्पादमनुच्छेदमशाश्वतम् ।
अनेकार्थमनानार्थमनागममनिर्गमम् ।
यः प्रतीत्य समुत्पादं प्रपञ्चोपशमं शिवम् ।
देशयामास संबुद्धस्तं वन्दे वदतां वरम् ॥

म. का. वृ., पा. ३-४.

न बध्यन्ते न मुच्यन्ते उदयव्ययधर्मिणः ।
संस्काराः पूर्ववत् सत्त्वो बध्यते नैव मुच्यते ॥
मा० का० १६-५.

इति नागार्जुनकृतमध्यमककारिकाप्रारम्भश्लोकौ तत्राक्षरसाम्यमप्यनुरुन्धाना गौडपादाः कारिकां न्यभान्त्सुः –

(1) न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ गौ० का० २-३२.

इति । तथा –

(२) यथा माया यथा स्वप्नो गन्धर्वनगरं यथा ।
तथोत्पादस्तथा स्थानं तथा भङ्ग उदाहृतः ॥ म० का० ७-३४

इति माध्यमिकः । एवमेव गौडपादाचार्यैरपि –

स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा ।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥ गौ. का० २-३१.

इति विश्वस्य स्वप्नमायासमत्वं वर्णितम् ॥

तथा कार्यकारणनिरासार्थम् –

(३) न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः ।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन ॥ मा०का० १-१.
न सन्नासन्न सदसन् धर्मो निर्वर्तते यदा ।
कथं निर्वर्तको हेतुरेवं सति हि युज्यते ॥ मा० का० १-७.

इति नागार्जुनः । गौडपादाचार्या अपि –

स्वतो वा परतो वापि न किञ्चिद् वस्तु जायते ।
सदसत् सदसद्वापि न किञ्चिद् वस्तु जायते ॥
गौ. का० ४-२२.

इत्येव वदन्ति ॥

(४) अन्यतो नापि चायातं न तिष्ठति न गच्छति ।
नायातः को विशेषोऽस्य यन्मूढैः सत्यतः कृतम् ॥
बो. च. ९-१४३.

इति विज्ञानवादिनः । एवमेतेऽप्याचार्याः –

न निर्गतास्ते विज्ञानाद् द्रव्यत्वाभावयोगतः ।
कार्यकारणताभावाद् यतोऽचिन्त्याः सदैव ते ॥
गौ. का ४-५२

इति लिखन्ति ॥

(५) अभूतपरिकल्पोऽस्ति द्वयं तत्र न विद्यते ।
शून्यता विद्यते तत्र तस्यामपि स विद्यते ॥ म. वि. १.

इति विज्ञानवादी । आचार्या अप्याहुः –

(अ) अभूताभिनिवेशोऽस्ति द्वयं तत्र न विद्यते ॥ गौ. का. ४-७५.

इति । विस्पष्टं च चित्तमात्रतामाहुः कारिकान्तरे –

(आ) चित्तस्पन्दितमेवेदं ग्राह्यग्राहकलक्षणम् ।
चित्तं निर्विषयं नित्यमसङ्गं तेन कीर्तितम् ॥ गौ. का. ४-७२.

इति ॥

तदेवं तत्र तत्र माहायानिकपक्ष एव शब्दतोऽर्थतश्च समनूदितो गौडपादाचार्यैः । तथा च प्रच्छन्नबौद्धा इमे इति नायमयुक्तोऽभियोगः परप्रास्थानिकानामिति भाति । तत्र कथमिमां भगवत्पादप्रक्रियां गौडपादसंप्रदायागतां वेदान्तानुमतत्वेन स्वीकुर्मः ? – इति जिज्ञासवः केचन शङ्केरन् ॥

**५५. कारिकाणां सांप्रदायिकत्वे संभावनायुक्तिः –** यद्यपि प्रतिपादितमेवेदं प्राक् श्रुतियुक्त्यनुभवसंगानेन इयमेवैका

प्रक्रिया श्रौतीति, तथापि परतन्त्रप्रज्ञाः श्रुत्यर्थं स्वयं निर्णेतुमसमर्था यथाप्रतिपादितेऽर्थे श्रद्धां न बध्नन्ति यावदस्यां सौगतमतगन्धिता कैश्चिद्भाष्यकारैर्ग्रन्थतत्त्वशोधकैश्चापादिता नापनोद्यते । अतस्तादृश-जिज्ञासुजनोपसंग्रहार्थं यत्नः कर्तव्यः ॥

तत्र ब्रूमः । उदाहृता एव संप्रदायविदोऽन्ये ये इमामेव प्रक्रियाम् आलम्ब्य वेदार्थं निरणैषुः । स्थितेषु च प्राचीनेषु संप्रदाय-विदां वचनेषु नाकस्मात् अद्वैतविद्वेषिणाम् अधुनातनप्रस्थानावलम्बिनां वचने पक्षपातो युक्तः परतन्त्रप्रज्ञस्य । किञ्च, सौगतैरेव **तत्त्वसंग्रहादि-ग्रन्थेषु शान्तरक्षितादिभिः,** औपनिषदमतपरीक्षणे प्रवृत्तैर्गौडपाद-कारिकोपात्तं मतं वेदान्तिमतत्वेनैव समुदाहृतम् इतीदमपि गमकं कारिकाणां साम्प्रदायिकार्थप्रतिपादकत्वे । न हि सौगताः स्वमतानु-कूलाभिप्रायवन्तमेवाचार्यं प्रतिवादिपक्षे निवेशयेरन् इति संभाव्यते । अपि च गौडपादकृतप्रकरणेषु प्रथममागमप्रकरणं रामानुजाचार्यै-रानन्दतीर्थैश्च श्रुतित्वेनैव स्वीकृतं भ्रान्त्या—इति किरणान्तरे निदर्शितं प्राक् । अतस्तस्मिन् प्रकरणे तावत् सौगतमतप्रवेशो न शक्यशङ्कः । यदि हि रामानुजसमये तत् प्रच्छन्नबौद्धकृतित्वेन निश्चितमभविष्यत्, ततो नैव तैः स्वाभिप्रायोपष्टम्भकप्रमाणत्वेनाग्रहीष्यत, न प्रागेव श्रुतित्वे-नेति स्पष्टम् । तस्मात्, गौडपादानां वेदान्तसंप्रदायवित्त्वेन साक्षाद् भगवत्पादैर्भाष्ये बहुमानितानां सर्वथा नास्ति मतान्तरप्रवेशशङ्का-संभावना अर्वाचीनप्रस्थानान्तरीयभाष्यकारमतेनापि । श्रीगौडपादाचार्यै-र्माण्डूक्योपनिषद्वाक्यानि खण्डशो विभज्य तदभिप्रायाविष्करणपराः कारिकाः 'अत्रैते श्लोका भवन्ति' इत्यवतारिकापूर्वकम् उपनिषन्मध्ये एव

तत्तत्खण्डनामान्तरान्तरा निवेशिताः, सांप्रदायिकैरद्वैतिभिश्च तथैवाधीयमानाश्चोपलभ्य, आगमप्रकरणमप्युपनिषदेवेति भ्रेमिरे मतान्तरीया भाष्यकाराः, कथञ्चिद् व्याख्यानकौशलप्रदर्शनेन ता अपि स्वस्वसिद्धान्तानुगुण्येन व्याकर्तुं प्रयेतिरे च । वैतथ्यादिप्रकरणानि तु स्वातन्त्र्येणैव पठ्यमानानि स्फुटतरमद्वैतप्रतिपादकानि च स्वोपज्ञनवीनसिद्धान्तानुसारेण नेतुमशक्नुवानाः, गौडपादानुयायिभाष्यस्थयुक्तीरपि प्रत्याख्यातुमसमर्थाः 'प्रच्छन्नबौद्धा इमे' इति गालिदानेनैव विनेयमनःसमाधानं विधातुमुपचक्रमिरे—इत्येवं युक्तं कल्पयितुम् ॥

५६. दर्शनवैलक्षण्यं प्रपञ्चोपशमतत्त्वविषये – आस्तां तावदियं सम्भावनायुक्तिः । साक्षान्नागार्जुनादिग्रन्थपरीक्षणेनापीदमवगम्यते यत्, शून्यविज्ञानवादयोर्गौडपादाचार्यसंमतवेदान्तदर्शनस्य च तमःप्रकाशवद् विरुद्धस्वभावतेति । तत्र कुत एवावकाशः सुगतनयप्रवेशशङ्काया भगवत्पादीयवेदान्तनये अधुनातनद्वैतिवेदान्तिनां तत्त्वविवेचनासामर्थ्यं शुद्धवेदान्तप्रक्रियाविद्वेषं वा मनसि कुर्वताम् ? तदेतदाविष्कर्तुं नागार्जुनगौडपादाचार्ययोर्विचारसरणिवैलक्षण्यमेव तावत् किञ्चिदुदाहरिष्यामः ॥

प्रथमं तावत् 'अनिरोधमनुत्पादम्' इति नागार्जुनकारिकार्धं 'न निरोधो न चोत्पत्तिः' (गौ. का. २–३२) इति गौडपादीयकारिकार्धेन तुलयामः । तत्र –

(१) यः प्रतीत्यसमुत्पादं प्रपञ्चोपशमं शिवम् ।
देशयामास संबुद्धस्तं वन्दे वदतां वरम् ॥

इति प्रतीत्यसमुत्पादमेव निरोधोत्पादराहित्येन विशिंषन् **नागार्जुनः** सर्वथा परमार्थात्मानं नाङ्गीकरोतीति स्फुटम् । सर्वेषामपि धर्माणां प्रपञ्चोपशमत्वम् इति खलु नागार्जुनस्य सिद्धान्तः । व्याख्यातं चैतदेवमेव **चन्द्रकीर्तिना** –

(1) प्रतीत्यशब्दोऽत्र ल्यबन्तः प्राप्तौ अपेक्षायां वर्तते । 'समुत्' पूर्वः पदिः प्रादुर्भावार्थः इति समुत्पादशब्दः प्रादुर्भावे वर्तते । ततश्च हेतुप्रत्ययापेक्षो भावानाम् उत्पादः प्रतीत्यसमुत्पादार्थः ॥

मा. वृ., पा. २.

(2) स एवेदानीं संवृतः प्रतीत्यसमुत्पादः स्वभावेन अनुत्पन्नत्वात् आर्यज्ञानापेक्षया 'नास्मिन् निरोधो वर्तते' इत्यनिरोधादिभिरष्टाभिर्विशेषणैर्विशेष्यते । यथा च निरोधादयो न सन्ति प्रतीत्यसमुत्पादस्य तथा सकलशास्त्रेण प्रतिपादयिष्यते । अनन्तविशेषणसंभवेऽपि प्रतीत्यसमुत्पादस्य अष्टानामेवोपादानम् एषां प्राधान्येन विवादाङ्गभूतत्वात् । यथावस्थितप्रतीत्यसमुत्पाददर्शने सत्याचार्या(?)णाम् अभिधेयादिलक्षणस्य प्रपञ्चस्य सर्वथा उपशमात् 'प्रपञ्चानाम् उपशमः अस्मिन्' इति स एव प्रतीत्यसमुत्पादः प्रपञ्चोपशम इत्युच्यते । चित्तचैत्यानां च तस्मिन् अप्रवृत्तौ ज्ञानज्ञेयव्यवहारनिवृत्तौ जातिजरामरणादिनिरवशेषोपद्रवरहितत्वात् शिवः ॥ मा. वृ. पा. ३.

इति । तदेवं प्रपञ्चोपशमशिवत्वेन विशेषितः प्रतीत्यसमुत्पाद एवात्रेति सिद्धम् । आत्मनिराकरणपूर्वकम् 'अनेकार्थमनानार्थम्' इत्याद्यपि तस्यैव प्रतीत्यसमुत्पादस्येत्येतत् प्रतिपादितं नागार्जुनेन –

(२) आत्मन्यसति चात्मीयं कुत एव भविष्यति ।
निर्ममो निरहङ्कारः शमादात्मात्मनीनयोः ॥ २ ॥
निर्ममो निरहङ्कारो यश्च सोऽपि न विद्यते ॥ ३ ॥

प्रतीत्य यद् यद्भवति न हि तावत् तदेव तत् ।
न चान्यदपि तत्तस्मान्नोच्छिन्नं न च शाश्वतम् ॥ १० ॥
अनेकार्थमनानार्थमनुच्छेदमशाश्वतम् ।
एतत् तल्लोकनाथानां बुद्धानां शासनामृतम् ॥ ११ ॥

इत्यात्मपरीक्षायाम् ॥

आचार्याः पुनः ‘ प्रपञ्चोपशमः शिवोऽद्वैत एवमोङ्कार आत्मैव संविशत्यात्मनात्मानं य एवं वेद ’ (मां. १२) इति श्रुतिमाश्रित्य –

(अ) प्रणवं हीश्वरं विद्यात् सर्वस्य हृदये स्थितम् ।
सर्वव्यापिनमोङ्कारं मत्वा धीरो न शोचति ॥ गौ.का. १–२८.
अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ।
ओङ्कारो विदितो येन स मुनिर्नेतरो जनः ॥ गौ.का. १–२९.

इत्यभिधानाभिधेयविभागरहितम् ओङ्कारोपलक्षितं सर्वात्मानमेव प्रपञ्चोपशमं शिवमाहुः । किञ्च,

(आ) एतैरेषोऽपृथग्भावैः पृथगेवेति लक्षितः ।
एवं यो वेद तत्त्वेन कल्पयेत् सोऽविशङ्कितः ॥ गौ.का. २-३०.

इति तस्मिन्नेवात्मनि अनात्मभावान् तदव्यतिरिक्तानेव पृथक्त्वेन कल्पयन्ति मूढाः – इत्युक्त्वा आहुः –

स्वप्नमाये यथा दृष्टे गन्धर्वनगरं यथा ।
तथा विश्वमिदं दृष्टं वेदान्तेषु विचक्षणैः ॥
न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥

इति (गौ. का. २–३१, ३२) आत्मा एक एव सत्यं परमार्थतः, तस्मिन् प्राणादयः, निरोधोत्पादादयश्च कल्पिताः स्वप्नादिवदिति । अतः

सुस्पष्टं महद् वैलक्षण्यं सर्वथा भावनिःस्वभावतावादात् सर्वभावाना-मात्मैकस्वभावतावादस्य ॥

### ५७. दर्शनवैलक्षण्यम् अजातिविषये – किञ्चान्यत् –

(१) न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः ।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन ॥ १-१.

[ चन्द्रकीर्तिटीका – तत्र जातु इति कदाचिदित्यर्थः । क्वचनशब्द आधारवचनः, क्वचिच्छब्दपर्यायः । ततश्च एवं संबन्धः – नैव स्वत उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन । एवं प्रतिज्ञात्रयमपि योज्यम् ॥ ]

न सन्नासन् न सदसन् धर्मो निर्वर्तते यदा ।
कथं निर्वर्तको हेतुरेवं सति हि युज्यते ॥ मा. का. १-७

इति सर्वथापि भावानामुत्पत्तिर्न संभवतीत्युक्त्वा प्राह –

यथा माया यथा स्वप्नो गन्धर्वनगरं यथा ।
तथोत्पादस्तथा स्थानं तथा भङ्ग उदाहृतः ॥ मा.का. ७-३४.

[चन्द्रकीर्तिः – यथा मायादयः स्वभावेनानुत्पन्ना अविद्यामायादि-शब्दवाच्याः, मायादिविज्ञानगम्याश्च लोकस्य, एवमेतेऽपि लोकप्रसिद्धिमात्रेणो-त्पादादयः स्वभावेनाविद्यमाना अपि भगवता तथाविधविनेयजनानुग्रह-चिकीर्षुणा निर्दिष्टाः-इति ॥ ]

इत्युत्पत्तिस्थितिलयानां सर्वथापि निषेधः कृतः, मायास्वप्नादिदृष्टान्त-मुपादायापि मायाविस्वप्नदृगादिसत्त्वमपि प्रत्याख्यातम्–इति सर्वथापि जात्यभाव एव तस्याजातिवादेन निर्वाह्यम् । आचार्यास्तु –

(अ) नेह नानेति चाम्नायादिन्द्रो मायाभिरित्यपि ।
अजायमानो बहुधा मायया जायते तु सः ॥ गौ. का. ३-२४.
सतो हि मायया जन्म युज्यते न तु तत्त्वतः ॥ गौ.का. ३-२७.

इति च ब्रुवन्तः परमार्थसत आत्मन एवोत्पत्तिस्थितिलयवत्त्वं माययेत्यङ्गीचक्रुः –

(आ) सृष्टिरिति सृष्टिविदो लय इति च तद्विदः ।
स्थितिरिति स्थितिविदः सर्वे चेह तु सर्वदा ॥ गौ. का. २-२८.

अत्र हि सृष्ट्यादयोऽप्यात्मनि विकल्पिता इत्युच्यन्ते । तथा हि भाष्यकृतः –

(इ) प्राणः प्राज्ञो बीजात्मा, तत्कार्यभेदा हि इतरे स्थित्यन्ताः । अन्ये च सर्वे लौकिका सर्वप्राणिपरिकल्पिता भेदा रज्ज्वामिव सर्पादयः, तच्छून्ये आत्मनि, आत्मस्वरूपानिश्चयहेतोरविद्यया कल्पिताः – इति पिण्डीकृतोऽर्थः ॥

इति । तदेवं परमार्थसद्भूतः परमात्मैव निरोधोत्पादादीनां विकल्पानाम् आस्पदमिति वेदान्तिमतम् ; निरास्पदा एव ते विकल्पा इति माध्यमिकनयः । यद्यपि पाश्चात्त्यविद्यापरिपाटीसंस्कृतविचारक्रममनुरुध्यमानाः केचिदभिप्रयन्ति – न माध्यमिका निरास्पदविकल्पवादिनः, शून्यमिति हि तैर्नासद्रूपः पदार्थ उच्यते, किं तु निर्विकल्पं बुद्धेरगोचरं तत्त्वं प्रज्ञापारमिताभिधम् । धर्माणां हि 'धर्मता', 'प्रज्ञापारमिता', 'भूतकोटिः', 'तथता'–इत्यादिशब्दैर्व्यपदिश्यत इति । तदेतन्नागार्जुनादीनां न संमत मिति वितत्योपपादितं **माण्डूक्यरहस्यविवृतौ**, तत एवाधिगन्तव्यं च । इह तु सङ्क्षेपेण इदमावेद्यते यत् प्रज्ञपारमितैव तावन्मायोपमत्त्वेनोद्घोषिता सौगतैरिति । तद्यथा –

(१) 'अद्वयज्ञानमेव केवलं भावतो भावरूपमिति निश्चित्य तदपि प्रतीत्यसमुत्पन्नत्वान्मायावन्निःस्वभावं तत्त्वतोऽपगतैकान्तभावाभावादिपरामर्शरूपम् – इति भावयन्....'॥ अ. स. आ., पा. ४९८–४९९.

(२) यत्र हि नाम निर्वाणमपि प्रतिविशिष्टं धर्माकायम् अद्वयज्ञान-स्वभावं मायास्वप्नसमानं वदामि तत्र किं पुनरन्यं धर्मं रूपकायं न वदामि ? .... यदि निर्वाणादपि कश्चिदन्यो विशिष्टतरो धर्मः संभवेत्, तदा तमपि मायादिसदृशं वदेयम् ॥ अ. स. आ. पा. १४४.

इति च अभिसमयालङ्कारालोके सुस्फुटं सर्वस्यापि मायोपमत्व-मेवोद्घोषितम् ॥

अपि च 'प्रज्ञापारमिताज्ञानमद्वयं सा तथागतः' इति दिङ्नागवचनम् अन्यथैव योजयित्वा खलु प्रज्ञापारमितायाः परमार्थत्व-मङ्गीकृतं बौद्धैरिति प्रतिज्ञायते अधुनातनैतिहासकैः। तत्र प्रज्ञापार-मितायाः मायोपमत्वमेव कण्ठरवेणोक्तं बौद्धैरित्यावेदितमधस्तात् । नागार्जुन एव साक्षात् तथागतस्यापि निःस्वभावत्वमेवाहेति कथङ्कारं तस्य परमार्थता माध्यमिकानां मता—इति युक्तं स्याद् वचः ? तथा हि नागार्जुनः—

(३) प्रपञ्चयन्ति ये बुद्धं प्रपञ्चातीतमव्ययम् ।
ते प्रपञ्चहताः सर्वे न पश्यन्ति तथागतम् ॥
तथागतो यत्स्वभावस्तत्स्वभावमिदं जगत् ।
तथागतो निःस्वभावो निःस्वभावमिदं जगत् ॥
मा. का. २२–१५, १६, पा. १६२.

इत्यपरमार्थत्वमेव सर्वस्याप्यवधारयति । तेन स्कन्धानां निरोधात् निरुपधिशेषं निर्वाणं लभ्यते – इत्येकदेशिमतमपि तेन नैवोपगम्यत इत्येव युक्तम् । यत आह –

(४) यद्यशून्यमिदं सर्वमुदयो नास्ति न व्ययः ।
प्रहाणाद् वा निरोधाद्वा कस्य निर्वाणमिष्यते ॥ मा. का. २५–२.

[अत्र चन्द्रकीर्तिः – 'शून्यवादिनः क्लेशानां बन्धानां वा निवृत्तिलक्षणं निर्वाणं नेच्छन्ति – इति । उत्तरत्र च 'सर्वोपलम्भोपशमः' इति कारिका-व्याख्यायां स्पष्टतरमाह – 'तस्मान्निर्वाणमपि नास्तीति सिद्धम्' इति ॥]

**५८. परमार्थनिर्धारणक्रमेऽपि दर्शनयोर्वैलक्षण्यम् –** अन्यच्च – 'न सन्नासन्न सदसन्' (मा. का. १–७) इति चतुष्कोटि-निरासेनैव यद्यपि जातिमात्रं निराकृतं **नागार्जुनेन**, तथापि सदसदादि-विकल्पा यद्विषयाः स परमार्थः कथञ्चिदपि न प्रतिपादितो भवति तावता । न हि विकल्पनिराकरणमात्रेण परमार्थसत्त्वमसत्त्वं वा साध्यते न च युक्त्या निषेधमात्रेणापि वस्तुतत्त्वं निराक्रियते । न हि प्रतीय-मानं वस्तु युक्तिमात्रेण 'असंभावितमिदम्' इति निराक्रियमाणमपि वस्तु न भवति । यथोक्तं भाष्यकारैः –

**(१) प्रमाणप्रवृत्त्यप्रवृत्तिपूर्वकौ संभवासंभवा अवधार्येते न पुनः संभवासंभवपूर्विके प्रमाणप्रवृत्त्यप्रवृत्ती ॥ सू. भा. २–२–२८, पा. २४९.**

इति । न चाद्वैतिभिरपि प्रमाणानां निराकरणात् नायमभियोगो युक्तः – इति वाच्यम् । अद्वैतिभिर्हि प्रमाणव्यवहारस्याविद्यापुरस्सरप्रवृत्ते-रनुभवानुसारियुक्त्या समुपपाद्यमानत्वात्, अविद्यायाश्च सत्यानृतयो-रितरेतराध्यासरूपायाः सर्वलोकप्रत्यक्षत्वात् । न त्वेवं व्यवहारस्यानृतत्वम् अनुभवानुसारियुक्त्या उपपाद्यते सौगतैरिति वैषम्यम् । अथ स्यात् –

**(1) द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।**
**लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥ मा. का. २४–८.**

[चन्द्रकीर्तिः – लोकसंवृत्त्या सत्यं लोकसंवृतिसत्यम् । सर्व एवाय-मभिधानाभिधेयज्ञानज्ञेयादिव्यवहारोऽशेषलोकसंवृतिसत्यमित्युच्यते । न हि परमार्थत एव तत् संभवति ॥ ]

इति सौगतैरपि प्रमाणादिव्यवहारस्यापरमार्थत्वमभ्युपगतमेवेत्यतोऽयमपि मिथ्याभियोग एवेति । नैतदेवम् –

(2) यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे ॥
मा. का. २४-१८.

इति प्रतीत्यसमुत्पादहेतुमात्रेण सर्वेषां धर्माणां निःस्वभावतासाधनात् सौगतैः प्रतीत्यसमुत्पादस्य च व्यावहारिकत्वात् –

(3) व्यवहारमनाश्रित्य परमार्थो न देश्यते ।
परमार्थमनागम्य निर्वाणं नाधिगम्यते ॥ मा. का. २४-१०.

इति वदता न किञ्चिदुक्तं स्यात् परमार्थशब्दितस्यापि व्यवहाराव्यतिरेकात् ॥

(4) निर्वाणस्य च या कोटिः कोटिः संसरणस्य च ।
न तयोरन्तरं किञ्चित् सुसूक्ष्ममपि विद्यते ॥ मा. का. २५-२०

इत्यभ्युपगमात् संसरणमेव निर्वाणम्, तच्च संसरणं प्रतीत्यसमुत्पादलक्षणसंवृतिच्छन्नमित्येवोक्तं भवति । एवं च न परमार्थविषये किञ्चित् प्रतिज्ञातम् । न च परमार्थ ईदृशः–इति प्रतिज्ञातुं शक्यते नागार्जुनानुयायिभिः । यतो यद्यत् प्रतिज्ञायते तस्य तस्य प्रतीत्यसमुत्पन्नत्वात्, शून्यमेव हि तद् भवेत् । आह चासौ स्वयम् –

(5) यदि काचन प्रतिज्ञा स्यान्मे तदेष मे भवेद्दोषः ।
नास्ति च मे प्रतिज्ञा तस्मान्नैवास्ति मे दोषः ॥
यदि किञ्चिदुपलभेयं प्रवर्तयेयं निवर्तयेयं वा ।
प्रत्यक्षादिभिरर्थैस्तदभावान्मेऽनुपालम्भः ॥ वि. व्या. २९, ३०

इति । अतो यदिदं युक्त्या निराकरणं प्रपञ्चस्य, अनिराकरणमेव वस्तुतो तद् भवेत् । यथोक्तं भाष्यकृद्भिः –

(२) न ह्ययं सर्वप्रमाणप्रसिद्धो लोकव्यवहारोऽन्यत् तत्त्वमनधिगम्य शक्यते अपह्नोतुम् । अपवादाभावे उत्सर्गप्रसिद्धेः ॥

सू. भा. २-२-३१, पा. २५२.

इति । आधुनिकैतिहासिकदृष्टिमवलम्ब्य 'शून्यता' 'तथता', 'भूतकोटिः, 'धर्मधातुः'–इत्यादिपर्यायाः सर्वविकल्पास्पदपरमार्थतत्त्वस्य व्यपदेशकाः सौगतैरभ्युपगम्यन्त इति प्रतिज्ञा न युक्तेत्यवोचाम । यदपि –

(6) अपरप्रत्ययं शान्तं प्रपञ्चैरप्रपञ्चितम् ।
निर्विकल्पमनानार्थमेतत् तत्त्वस्य लक्षणम् ॥

मा. का. १८-९.

इति वचनं **नागार्जुनस्य**, तदपि न परमार्थतत्त्वस्यानुभवगोचरतामापादयितुमिति ' निवृत्तमभिधातव्यं निवृत्ते चित्तगोचरे ' इति समनन्तरपूर्वकारिकोक्तनीत्या धर्माणां धर्मता अनुत्पन्ना अनिरुद्धा चेत्यतः न किञ्चित् तत्राभिधातव्यमस्तीत्यतः स्वयमेवाधिगन्तव्या–इत्यभिप्रायकम् ॥

तथा हि व्याख्याति स **चन्द्रकीर्तिः** –

' यथा हि तैमिरिकाः वितथं कणमशकमक्षिकादिरूपं पश्यन्तो वितिमिरोपदेशादपि न शक्नुवन्ति कणा(दी?)नां यथावदवस्थितं स्वरूपदर्शनन्यायेनाधिगन्तव्य मतैमिरिकवदधिगन्तुम्, किं तर्हि अतैमिरिकोपदेशात् मिथ्यैतदित्येतावन्मात्रमेव प्रतिपद्यन्ते यदा तु तिमिरोपघात्यविपरीतशून्यतादर्शनाञ्जितनयनाः सन्तः समुत्पन्नतत्त्वज्ञाना भवन्ति तदा तत्तत्त्वाधिगमनयोगेन स्वयमधिगच्छन्तीति । एवम् अपरप्रत्ययं भावानां यत् स्वरूपं तत् तत्त्वम् । एतच्च शान्तभावमतैमिरिककणादर्शनवत् स्वभावविरहितम् इत्यर्थः । अत एतत् प्रपञ्चैरप्रपञ्चितम् । प्रपञ्चो हि वाक्, प्रपञ्चयत्यर्थान् इति कृत्वा । प्रपञ्चैरप्रपञ्चितम् । वाग्भिरव्याकृतम् इत्यर्थः । निर्विकल्पकम् चित्तरागतद्रहितत्वात् तत्तत्त्वं

निर्विकल्पकम् । .... नात्र किञ्चित्परमार्थतो नानाकरणम् । तत् कस्माद् हेतोः ? स परमार्थतोऽत्यन्तानुत्पादत्वात् सर्वधर्माणामिति । तदेवम् अनानार्थता तत्त्वस्य लक्षणं वेदितव्यं शून्यतया एकरूपत्वात् ॥

मा. का. वृ. पा. १३३-१३४.

इति ॥

अत्र सर्वधर्माणामनुत्पाद एव तत्त्वं कणमशकादिवदित्येतावदुक्तम्, न त्वनुभवप्रदर्शनं किञ्चित्–इति न पृथग् वक्तव्यम् ॥

आचार्यगौडपादैः पुनः –

(३) अजमनिद्रमस्वप्नं प्रभातं भवति स्वयम् ।
सकृद्विभातो ह्येवैष धर्मो धातुस्वभावतः ॥ ४-८१.

इति श्रुतिनिर्दिष्टावस्थात्रयशून्यस्वयंप्रकाशतुरीयतत्त्वमेवाजाद्वयं निर्दिश्य चतुष्कोटिवर्जितत्त्वं परमार्थतत्त्वस्य सार्वत्रिकानुभवगम्यमिति नैव युक्त्या प्रत्याख्येयमिति च विशदयामासुः –

(४) अस्ति नास्त्यस्ति नास्तीति नास्ति नास्तीति वा पुनः ।
चलस्थिरोभयाभावैरावृणोत्येव बालिशः ॥ गौ. का. ४-८३.
कोट्यश्चतस्र एतास्तु ग्रहैर्यासां सदावृतः ।
भगवानाभिरस्पृष्टो येन दृष्टः स सर्वदृक् ॥ गौ. का. ४-८४

इति । अस्तिनास्त्यादिसर्वविकल्पनावर्जितः परमात्मा–इत्यभिप्रायः । 'स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यते' (बृ. ३–९–२६) इत्यादि श्रुतेः। आत्मा हि नाम स्वरूपम् । न च स्वस्यैव स्वरूपम् अस्तीत्यवधारयितुम्, नास्तीति प्रत्याख्यातुम्, 'अस्ति वा नास्ति वा' इति संशेतुम्, 'एवं स्यात्' इति विकल्पयितुं वा शक्यं केनचित् । य एव ह्यवधारयिता, प्रत्याख्याता, संशयिता, विकल्पयिता वा तस्यैव

स्वरूपत्वादस्यात्मनः । किं बहुना, आत्मशब्दवाच्यत्वमपि कदाचिन्निराक्रियेत, आत्मत्वेन चिन्त्यत्वमपि, न तु स्वस्य निर्विशेषं स्वरूपं कथञ्चित्, जातुचिदपि । तस्मात् साधूच्यते आचार्यैः सर्वकोटिभिरसंस्पृष्टं परमार्थस्वरूपं येन दृष्टम्, स सर्वदृगिति ॥

५९. **शून्यमततुलनोपसंहारः** – तदयमेतावता विचारेण निर्गलितोऽर्थः –

(१) आचार्यो हि 'न तत्र रथाः' (बृ. ४–३–१०) इत्यादिश्रुत्यनुगृहीतं तदनुकूलं च तर्कम् आश्रित्य स्वप्नजागरितयोर्दृश्यमानानां भेदानां सममेव तत्तदवस्थामात्रप्रतिबद्धत्वात्, अन्यत्रासत्त्वाच्च, मिथ्यात्वम् इत्यनुभवाङ्गयुक्तिं दर्शयति –

(अ) **स्वप्नजागरिते स्थाने ह्येकमाहुर्मनीषिणः ॥ गौ. का. २–५.**

(आ) **आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ।**
**वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥ गौ. का. २–६.**

इति । माध्यमिकस्तु प्रतीत्यसमुत्पन्नत्वात् भावानां स्वभावशून्यत्वमाह युक्तिमात्रमनुसरन् –

(1) **प्रतीत्य यद् यद्भवति तत्तच्छान्तं स्वभावतः ॥ मा. का. ७–१७.**

(2) **यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचक्ष्महे ॥ मा का. २४–१८.**

इति च ॥

(२) आचार्यस्तावत् स्वप्नजाग्रत्स्थानयोः सर्वसमत्वेनोभयोरपि चेद् वैतथ्यम्, कस्तेषां विकल्पकः, को वा तत्तत्त्वनिश्चेता ? – इति शङ्काम् उद्भाव्य 'त्रयः स्वप्नाः' (ऐ. १–३–१२), 'दृष्ट्वैव पुण्यं च

पापं च' (बृ. ४-३-१७) – इत्याद्याः, अनुभवानुगुणाः श्रुतीरेवाश्रित्य आत्मैव तत्र मायया विकल्पको निश्चेता च, आत्मैव च भेदत्वेन विकल्पितः इत्याह –

(अ) कल्पयत्यात्मनात्मानमात्मा देवः स्वमायया ।
स एव बुध्यते भेदानिति वेदान्तनिश्चयः ॥ गौ. का. २-१२.

इति । माध्यमिकस्तु –

(१) अविद्यमाने भावे च कस्याभावो भविष्यति ।
भावाभावविधर्मा च भावाभावमवैति कः ॥ मा. का. ५-६.

इत्यनुभवन्यक्कारेण भावाभावपदार्थानां सममेवाभावताम्, भावाभावविसदृशस्य परीक्षकस्याप्यभावतां प्रतिजानीते केवलयुक्तिमाश्रित्य ॥

(३) किञ्च, आचार्यो द्वैतमात्रस्य प्रतीतरूपेण मायात्वं परमार्थस्वरूपेणाद्वैतत्वं च ब्रूते 'ब्रह्मैवेदं विश्वम्' (मुं. २-२-११), 'अजायमानो बहुधा विजायते' (तै. आ. ३-१३-३९) इत्यादिश्रुतिप्रमाणं तदनुगुणं तर्कं च संश्रित्य –

(अ) अद्वैतं परमार्थो हि द्वैतं तद्भेद उच्यते ॥ गौ. का. ३-१८.

(आ) मायया भिद्यते ह्येतन्नान्यथाजं कथञ्चन ।
तत्त्वतो भिद्यमाने हि मर्त्यताममृतं व्रजेत् ॥ ३-१९.

(इ) प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ गौ. का. १-१७.

इति । शून्यवादी पुनः, द्वैताद्वैतादिसर्वदृष्टीनां प्रहाणार्थमेव स्वसंप्रदायकर्तुः प्रवृत्तिम्, स्वस्य च सर्वदृष्ट्यनाश्रयणमेवेतरेभ्यो वैशिष्ट्यम्, अन्ततः शून्यस्याप्यशून्यतामेव च प्रतिजानीते –

(1) सर्वदृष्टिप्रहाणाय यः सद्धर्ममदेशयत् ।
अनुकम्पामुपादाय तं नमस्यामि गौतमम् ॥ मा॰का॰ २७-३०.

(2) शून्यता सर्वदृष्टीनां प्रोक्ता निःसरणं जिनैः ।
येषां तु शून्यता दृष्टिस्तानसाध्यान् बभाषिरे ॥ मा॰का १३-८.

(3) यद्यशून्यं भवेत् किञ्चित् स्याच्छून्यमिति किञ्चन ।
न किञ्चिदस्त्यशून्यं च कुतः शून्यं भविष्यति ॥ मा॰का. १३-७.

इति । तदेवम् –

(4) निर्मितको निर्मितकं मायापुरुषः स्वमायया सृष्टम् ।
प्रतिषेधयते यद्वत् प्रतिषेधोऽयं तथैव स्यात् ॥ वि॰ व्या॰ २३.

['एवमेव मद्वचनेन शून्येन सर्वभावानां स्वभावप्रतिषेध उपपन्नः' इति तद्व्याख्यान च ॥ ]

इति सर्वभावानां तत्प्रतिषेद्धुः, प्रतिषेधस्य च, किं बहुना शून्यस्यापि स्वभावशून्यतां ब्रुवाणस्य माध्यमिकस्य –

अकल्पकमजं ज्ञानं ज्ञेयाभिन्न प्रचक्षते ।
ब्रह्मज्ञेयमजं नित्यमजेनाजं विबुध्यते ॥ गौ॰ का॰ ३-३३.

इति मायिकज्ञातृज्ञानादिविकल्पास्पदमद्वैतब्रह्मात्मतत्त्वं वेदान्तसिद्धं सर्वस्याप्यात्मभूतमुपदेष्टुा साम्यं न कोऽपि कथञ्चिदपि कल्पयेत् विना दुरभिनिवेशविपर्ययज्ञानान्यतरतिमिरान्धम्–इत्यलमतिप्रपञ्चेन ॥

६०. वेदान्तिसंमतविज्ञानस्य वैलक्षण्यं बौद्धाभिमतविज्ञानात् – एतेन विज्ञानवादसाम्यमप्यपास्तं वेदितव्यम् । तथा हि अत्र तावदिदं मनसि करणीयं यदाचार्येण 'मतान्तराभिनिविष्टैरपि परस्परं विवदमानैस्तत एवाजाद्वयमात्मतत्त्वं परिदीप्यत इत्याविष्कर्तुम्

अलातशान्तिप्रकरणमारिप्समाणेन प्रप्रथमं मङ्गलश्लोक एवाद्वैतात्मदर्शनं प्रतिज्ञातम् । विशिष्य च दर्शनसतत्त्वप्रतिपादनान्ते बुद्धोपदिष्ट-विज्ञानवादतोऽद्वैतदर्शनस्य स्वसंप्रदायानुमतस्य वैलक्षण्यं कण्ठरवेणोक्तम् इति ॥

तत्रोपक्रमे तावत् –

(१) ज्ञानेनाकाशकल्पेन धर्मान् यो गगनोपमान् ।
ज्ञेयाभिन्नेन संबुद्धस्तं वन्दे द्विपदां वरम् ॥ गौ. का. ४–१.

इति शून्यवादादिव विज्ञानवादादपि स्वाभीष्टाद्वैततत्त्वस्य विशेषमाह । तथा हि – यथा आकाशं निःस्वभावम्, एवं ज्ञानमपि–इति शून्य-वादिनः ; विज्ञानवादिनस्तु निरालम्बनत्वादेव विज्ञानस्यासङ्गत्वम्, क्षणिकविज्ञानपरिणामत्वाच्च विषयाणां विज्ञानमात्रत्वं न तु तेषां स्वातन्त्र्येणाप्यस्तित्वम् इत्याहुः । तदेतदुभयं व्यावृत्य कूटस्थविज्ञान-मात्रमेव सतत्त्वं ज्ञातृज्ञानज्ञेयानां न तु ततः पृथक्सत्ता तेषामस्ती-त्युच्यते । यथाह भगवान् भाष्यकृत् –

(1) उपदेष्टृनमस्कारमुखेन ज्ञानज्ञेयज्ञातृभेदरहितं परमात्मतत्त्व-दर्शनमिह प्रकरणे प्रतिपिपादयिषितं प्रतिपक्षप्रतिषेधद्वारेण प्रतिज्ञातं भवति ॥ गौ. का. भा. ४–१, पा. २२८.

इति । उपसंहारे खल्वपि –

(२) क्रमते न हि बुद्धस्य ज्ञानं धर्मेषु तायिनः ।
सर्वे धर्मास्तथा ज्ञानं नैतद् बुद्धेन भाषितम् ॥ गौ.का. ४-९९.

इति । व्याचष्टे चैतद् भाष्यकारः –

(2) यस्मात्, न हि क्रमते बुद्धस्य परमार्थदर्शिनः, ज्ञानं विषयान्तरेषु धर्मेषु, धर्मसंस्थं सवितरीव प्रभा । तायिनः तायो अस्यास्तीति तायी । संतानवतः, निरन्तरस्य आकाशकल्पस्य - इत्यर्थः। पूजावतः, प्रज्ञावतो वा । सर्वे धर्माः आत्मानोऽपि तथा ज्ञानवदेव आकाशकल्पत्वात् न क्रमन्ते क्वचिदपि अर्थान्तरे इत्यर्थः । यदादौ उपन्यस्तं 'ज्ञानेनाकाशकल्पेन' इत्यादि । तदिदम् आकाशकल्पस्य तायिनः बुद्धस्य तदनन्यत्वात् आकाशकल्पम्, ज्ञानं न क्रमते क्वचिदप्यर्थान्तरे । तथा धर्माः इति । आकाशमिव अचलम्, अविक्रियम्, निरवयवं नित्यम्, अद्वितीयम्, असङ्गम्, अदृश्यम्, अग्राह्यम्, अशनायाद्यतीतं ब्रह्मात्मतत्त्वम्, 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' (बृ.) इति श्रुतेः । ज्ञानज्ञेयज्ञातृभेदरहितं परमार्थतत्त्वमद्वयमेतत् न बुद्धेन भाषितम् । यद्यपि बाह्यार्थनिराकरणं ज्ञानमात्रकल्पना च अद्वयवस्तुसामीप्यमुक्तम् । इदं तु परमार्थतत्त्वम् अद्वैतं वेदान्तेष्वेव विज्ञेयम् - इत्यर्थः ॥

गौ. का. भा., पा. २५६.

[अत्र 'विषयान्तरेषु ज्ञानं न क्रमते' इति ज्ञेयस्य स्वातन्त्र्येण सत्त्वं निरस्तम् । 'तायिनः' इति सन्ततचैतन्यस्वरूपमुक्तम् । 'आत्मानोऽपि धर्मशब्दवाच्या नार्थान्तरेषु क्रमन्ते' इति परमात्मस्वरूपेण तेषामैक्यमुक्तम् । आत्मनो ज्ञानं सवितरीव प्रभा स्वाश्रयाभिन्नमिति चोक्तम् ॥ ]

अर्वाचीनविज्ञानवादिनस्तु 'तायः स्वदृष्टमार्गोक्तिः', 'तायो वा चतुःसत्यप्रकाशनम्' (प्र. वा. २-१४६, १४७) इत्याहुः । अत्र तु तायः सर्वत्र सन्ततो भावः, आकाशवत्सर्वगतचैतन्यस्वभावत्वमित्युक्तमिति विशेषः । ज्ञातृज्ञेयज्ञानानां सर्वेषामपि 'आकाशवत् सर्वगतश्च नित्यः'(?) 'येन सर्वमिदं ततम्' (गी. २-१७) इति च श्रुतिस्मृत्यनुसारेण अद्वितीयचैतन्यमात्रेण रूपेण सर्वव्यापित्वं हि बुद्धेन - विज्ञानवादरीत्यापि - न भाषितम् । यत्तु भाष्यम् 'अद्वयवस्तुसामीप्यमुक्तं'

तेनेति, तदुक्तविज्ञानस्य बाह्यार्थनिरपेक्षस्यैव ज्ञानज्ञेयव्यवहारसाधक-युक्त्युपेतत्वात् । तयैव हि युक्त्या क्षणिकविज्ञानमपि विषयकोटौ विनिवेश्य आत्माविद्ययैव सर्वप्रमाणप्रमेयव्यवहारः – इति शक्यते उपपादयितुम्, ततश्च प्रपञ्चोपशमं शिवमद्वैततत्त्वं सेत्स्यतीत्यभिप्रायेणैव-मुच्यते, न तु व्यावहारिकानुभवापलापेन बाह्यार्थनिराकरणं युक्तमिति कृत्वा । विज्ञानवादस्य विस्तीर्णतरं सूत्रभाष्ये निराकृतत्वात् – इति बोध्यम् ॥

६१. **बाह्यार्थनिराकरणप्रकारे वैषम्यं दर्शनयोः** – यत्तूच्यते विज्ञानवादिभिर्बौद्धैः –

**अन्यतो नापि चायातं न तिष्ठति न गच्छति ।**
**मायातः को विशेषोऽस्य यन्मूढैः सत्यतः कृतम् ॥**
**बो. च. ९-१४३.**

तत्र यद्ययमभिप्रायः – चित्तमेव तु सत्यम्, तद्व्यतिरेकेण ज्ञानवैचित्र्यनिमित्तं नास्त्येव–इति, तर्हि तेनैव न्यायेन इदमभ्युपगन्तव्यं भवति यद् यथैव असत्यपि घटादौ निमित्ते चित्तं स्वभावत एव तद्वदवभासते, एवमेव चित्तद्रष्टृात्मव्यतिरेकेण चित्तमपि नास्त्येव, अविद्यास्वभावत एव तु निर्मलोऽप्यात्मा चित्तवदवभासत इत्याहु-राचार्याः –

(१) **तस्मान्न जायते चित्तं चित्तदृश्यं न जायते ।**
**तस्य पश्यन्ति ये जातिं खे वै पश्यन्ति ते पदम् ॥ ४-२८.**

इति ॥

[**अत्र भाष्यम्** – यस्मादसत्येव घटादौ घटाद्याभासता चित्तस्य विज्ञानवादिना अभ्युपगता तदनुमोदितमस्माभिरपि, भूतदर्शनात् । तस्मात्, तस्यापि चित्तस्य जायमानावभासता असत्येव जन्मनि युक्ता भवितुम् ॥]

अथ स्वप्नमायादाविव असत्या एव विषया तद्द्रष्टृचित्तात् पृथग्विद्यमाना इवावभासन्त इति, तत्राप्याहुराचार्याः –

(२) स्वप्नदृक् प्रचरन् स्वप्ने दिक्षु वै दशसु स्थितान् ।
अण्डजान् स्वेदजान् वापि जीवान् पश्यति यान् सदा ॥
स्वप्नदृक्चित्तदृश्यास्ते न विद्यन्ते ततः पृथक् ।
तथा तद्दृश्यमेवेदं स्वप्नदृक्चित्तमिष्यते ॥
चरञ्जागरिते जाग्रद्दिक्षु वै दशसु स्थितान् ।
अण्डजान् स्वेदजान् वापि जीवान् पश्यति यान् सदा ॥
जाग्रच्चित्तेक्षणीयास्ते न विद्यन्ते ततः पृथक् ।
तथा तद्दृश्यमेवेदं जाग्रतश्चित्तमिष्यते ॥
४–६३तमश्लोकमारभ्य ६६तमश्लोकपर्यन्तम् ॥

[अत्र स्वप्नजागरितयोः पृथक् पृथक् चित्तं तद्व्यतिरेकेण तद्द्रष्टा आत्मा च अनुभवानुसारेण प्रतिज्ञातः । स्वप्नजागरितद्रष्टुरैक्यं 'स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति' (का. २–१–४) इति श्रुत्यनुरोधेन सार्वत्रिकानुभवमेवाश्रित्योपपादितम् ॥ ]

यथोदाहृतकारिकाः 'त्रयः स्वप्नाः' (ऐ.) इत्यादिश्रुतिभ्यः स्वप्नजागरितयोः सर्वसाम्येन वैतथ्यमूरीकृत्य विज्ञानवादाद् वैलक्षण्यं वेदान्तदर्शनस्य ख्यापयन्ति । सूत्रभाष्ये तु केवलयुक्त्या स्वप्नमायादितौल्यं सिषाधयिषतो विज्ञानवादिनो दृष्टान्त एवासिद्ध इति प्रत्यवस्थितम् –

(३) वैधर्म्यं हि भवति स्वप्नजागरितयोः । किं पुनर्वैधर्म्यम् ? बाधाबाधाविति ब्रूमः । बाध्यते हि स्वप्नोपलब्धं वस्तु प्रतिबुद्धस्य 'मिथ्या मयोपलब्धो महाजनसमागम इति । न ह्यस्ति मम महाजनसमागमः ; निद्राग्लानं तु मे मनो बभूव तेनैषा भ्रान्तिरुद्बभूव' –

**इति । एवं मायादिष्वपि भवति यथायथं बाधः । नैवं जागरितोपलब्धं वस्तु स्तम्भादिकं कस्याञ्चिदपि अवस्थायां बाध्यते ॥**

**सू. भा. २-२-२९, पा २५०.**

न चैवं वेदान्तिनोऽपि दृश्यमिथ्यात्वं न सिध्येत् इति वाच्यम् । तस्य व्यावहारिकदृष्ट्या इष्टापत्तेः । इष्टमेव ह्यापाद्यते यद् विषयाणां जाग्रति सत्यमिथ्याविभक्तत्वमस्तीति । 'सत्यं चानृतं सत्यमभवत्' (तै.) इति श्रुतेः । परमार्थदृष्ट्या तु न केवलं चित्तदृश्ययोः, किं तर्हि सर्वस्यापि बाह्यस्याध्यात्मिकस्य च सर्वथापि मिथ्यात्वमेवेति वैतथ्ये उपपादितम् ॥

तदेवं बाह्यमते दृष्टान्तासिद्धेः, मायातः को विशेषः?' इति मृषैवोच्यते, 'अन्यतो नापि चायातम्' इति च । आचार्यैस्तु स्वप्नजागरितयोः सर्वसमताम् उपपाद्य, सुषुप्ते उभयोरप्यभावं सर्वानुभवसिद्धं श्रुत्यानुगुण्येन प्रदर्श्यैवोच्यते –

**एवं न जायते चित्तमेवं धर्मा अजाः स्मृताः ।**
**एवमेव विजानन्तो न पतन्ति विपर्यये ॥ ४-४६.**

इति चित्तस्याप्यजातिः, जीवानामजाद्वयस्वरूपेणैकता च । तादृशाजाद्वयं कूटस्थचैतन्यमेव विज्ञानशब्देन व्यपदिश्य लिखितं तैः –

**विज्ञाने स्पन्दमाने वै नाभासा अन्यतोभुवः ।**
**न ततोऽन्यत्र निस्पन्दान्न विज्ञानं विशन्ति ते ॥ का. ४-५१.**
**न निर्गतास्ते विज्ञानात् द्रव्यत्वाभावयोगतः ।**
**कार्यकारणताभावाद् यतोऽचिन्त्याः सदैव ते ॥ का. ४-५२.**

अविद्यया स्पन्दमाने विज्ञाने जाग्रत्स्वप्नयोराभासा दृश्यन्ते, स्वतो विज्ञानं कूटस्थचैतन्यमेवावतिष्ठते इत्यर्थः ॥

अतो विज्ञानशब्दोपादानमात्रात् न शङ्कितव्यं साम्यमुभयोर्दर्शनयोर्बाह्यार्थनिराकरणविषये । यत एकत्र चित्तदृश्यमात्रं युक्त्याभासेन निराक्रियते, इतरत्र तु सर्वमेव चित्तं चेत्यं च आभासमानरूपेण अचिन्त्यम् इत्युपपाद्य स्वरूपेण सर्वं अजाद्वयचिन्मात्रमेवेत्यनुभवानुसारियुक्त्या प्रदर्श्यत इति स्थितम् ॥

## ६२. चित्तशब्दप्रयोगमात्रेण न परमतसाम्यम् –

यदप्याशङ्क्यते 'अभूताभिनिवेशोऽस्ति' (गौ. का. ४–७५), 'चित्तस्पन्दितमेवेदम्' (का. ४–७२) इति च विज्ञानवादिमतमेवानुमतमाचार्यैरपीति । तदप्येतेन प्रत्युक्तम् । एवं हि विज्ञानवादिकारिकां व्याख्याति **स्थिरमतिः** –

> (1) न खलु अभूतपरिकल्पोऽपि न भवति । यथा रज्जुः शून्या सर्पत्व(स्व)भावेन – तत्स्वभावत्वाभावात् सर्वकालं शून्या–न तु रज्जुस्वभावेन, तथा इहापि । ........यत् शून्यं तस्य सद्भावात्, येन शून्यं तस्य तत्राभावात्[1] ॥ म. वि. सू. भा. टी., पा. १२, १३.

इति । तत्र चित्तमेव 'अभूतपरिकल्प'शब्देन व्यपदिश्यते । तस्मिन् ग्राह्यग्राहकविभागलक्षणं द्वयम् अभूतमेव परिकल्पितमिति कृत्वा । गौडपादाचार्यास्तु जाग्रत्स्वप्नयोश्चित्तं चित्तदृश्यं जीवादि चेत्युभयम् इतरेतरसापेक्षत्वात् स्वातन्त्र्येण न किमप्यस्ति (का. ४–६७), जीवाः

---

1. इयं कारिका मैत्रेयनाथस्य मध्यान्तविभङ्गसूत्रभाष्यटीका च स्थिरमतेः, प्रो. वि. भट्टाचार्यः, तथा वि. तुच्ची–इत्येताभ्यां संपादिता ; प्रो. टि. आर्. वि. मूर्तिशर्मणा The Central Philosophy of Buddhism नामक ग्रन्थे समुदाहृता च ॥

सर्वे स्वप्नमया इव मायामया इव निर्मितका इव च अविद्यमाना एव चित्तविकल्पनमात्ररूपाः (का. ६८, ६९, ७०)–इति स्थापयित्वा –

**न कश्चिज्जायते जीवः संभवोऽस्य न विद्यते ।**
**एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते ॥ का. ४-७१.**

[**भाष्यम्** – व्यवहारसत्यविषये जीवानां जन्ममरणादिः स्वप्नादिजीववदित्युक्तम् । उत्तमं तु परमार्थसत्यं न कश्चिज्जायते जीव इति ॥]

इत्यद्वैतप्रकरणोक्तम् (का. ३–४८) अजातिब्रह्मवादमेवोपसंजह्रुः ॥

तत ऊर्ध्वम् इयं कारिका प्रवृत्ता –

**चित्तस्पन्दितमेवेदं ग्राह्यग्राहकवद् द्वयम् ।**
**चित्तं निर्विषयं नित्यमसङ्गं तेन कीर्तितम् ॥ का. ४-७२.**

इति । सेयम् –

**यथा स्वप्ने द्वयाभासं स्पन्दते मायया मनः ।**
**तथा जाग्रद्द्वयाभासं स्पन्दते मायया मनः ॥ का. ३-२९.**

[**भाष्यम्** – मनः परमार्थदृष्ट्या आत्मरूपेणावेक्ष्यमाणं सत् ग्राह्यग्राहकरूपेण द्वयाभासं स्पन्दते स्वप्ने मायया; रज्ज्वामिव सर्पः । तथा तद्वदेव जाग्रत् जागरिते स्पन्दते मायया मनः । स्पन्दत इव इत्यर्थः ॥]

इत्यद्वैतप्रकरणकारिकया एकवाक्यतामापन्ना आत्मवाद एव पर्यवसन्नास्तीत्यतः –

**अभूताभिनिवेशोऽस्ति द्वयं तत्र न विद्यते ॥ का. ४-७५.**

इत्यत्र कूटस्थात्मनि द्वैतमभिनिवेशमात्राद् विकल्पितं न-तु वस्तुतोऽस्तीत्येवाभिप्रायः । न तत्र जाग्रन्मात्रलब्धजीवितविज्ञानवार्ताया गन्धोऽप्यस्तीति स्फुटम् ॥

## ६३. लोकोत्तरशब्दोपादानं न बौद्धसाम्यमावहति –

इदं चापरमस्ति साम्यमुद्भावितं कैश्चित्, अविचाररमणीयम् । बौद्धैर्योगाचारैरुक्तम् –

(1) एवं वितथविकल्पाभ्यासवासनानिद्रया प्रसुप्तो लोकः स्वप्न इवाभूतमर्थं पश्यन् अप्रबुद्धस्तदभावं यथावन्नावगच्छति । यदा तु तत्प्रतिपक्षलोकोत्तरनिर्विकल्पज्ञानलाभात् प्रबुद्धो भवति, तदा तत्पृष्ठलब्धशुद्धलौकिकज्ञानसंमुखीभावात् विषयभावं यथावदवगच्छतीति समानमेतत् ॥ विं. १७, पा. १०९.

इति । अत्र यथैव लोकशुद्धलौकिकलोकोत्तरशब्दाः समुपात्ता वसुबन्धुना, तथैव आचार्यैरपि –

(१) सवस्तु सोपलम्भं च द्वयं लौकिकमिष्यते ।
अवस्तु सोपलम्भं च शुद्धं लौकिकमिष्यते ॥

अवस्त्वनुपलम्भं च लोकोत्तरमिति स्मृतम् ॥

का ४-८७, ८८.

इति; अतो योगाचारविज्ञानवादिमतमेवेदमिति । ते साहसिकाः खद्योतशब्दसाम्यात् सहस्रकिरणोऽपि भानुः कीटविशेषात् प्रकाशं वृणीते स्मेत्यपि ब्रूयुः । यतो लोकोत्तरशब्देन समाधिविशेषो विवक्ष्यते योगाचारैः, ग्राह्यग्रहणविवर्जितं सुषुप्तमेव त्वाचार्यैः । योगिनामपि ज्ञानभूमिकातारतम्यमभ्युपगम्यते योगाचारैः; सुषुप्त्यनुभवे तारतम्यं नैवाङ्गीक्रियते आचार्यैः, शक्याभ्युपगमं वा क्वचिदपि । किञ्च सुप्तिसमाध्योर्द्वैताभावः समानमेवेत्यभ्युपगम्यते वेदान्तिभिः । आहुर्हि भाष्यकाराः –

(२) यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्याम् अविभागप्राप्तौ मिथ्याज्ञानस्य अनपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवति ॥ सू. भा. २-१-९, पा. १९१.

इति ॥

६४. योगसापेक्षत्वनिरपेक्षत्वाभ्यामपि वैलक्षण्यं दर्शनयोः– अपि च वेदान्तसंप्रदाये यद्यपि मनोनिग्रहलक्षणो योगः समुपदिश्यते मध्यमाधिकारिणः प्रति । तथापि स योगो न मनसो भूमिकाविशेषः, अपि तु ब्रह्मतादात्म्यानुभवेन अमनीभाव एवेति वैषम्यम् । तथा हि

(1) यदा त्वालम्बनं ज्ञानं नैवोपलभते तदा ।
स्थितं विज्ञानमात्रत्वे ग्राह्याभावे तदग्रहात् ॥ त्रि. २८.

इति समाधौ विज्ञानमात्रत्वोपगमेऽपि, विज्ञानस्य स्वविषयत्वेनैव सिद्धेः तस्य स्वालम्बनत्वाभावः कथमपि न शक्यचिन्तनो बौद्धदर्शने । वेदान्तिनये तु ‘ विज्ञातारमरे केन विजानीयात् ’ (बृ. २-४-१४) इत्यादिश्रुत्यनुसारेणात्मनो नित्याविज्ञेयत्वाभ्युपगमात्, वाङ्मनसागोचरनित्यस्वयंज्योतीरूपेणावस्थानमेव समाधिर्नान्यः –

(१) सर्वाभिलापविगतः सर्वचिन्तासमुत्थितः ।
सुप्रशान्तः सकृज्ज्योतिः समाधिरचलोऽभयः ॥ का. ३-३७.

इत्युक्तमाचार्यैः । मध्यमाधिकार्यनुष्ठेयमनोनिग्रहस्यापि स्वरूपावस्थानपर्यवसायित्वेनैवोपदेशोऽत्र । उक्तं हि –

(२) यदा न लीयते चित्तं न च विक्षिप्यते पुनः ।
अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा ॥ ३-४६.

इति ॥

अत एवात्राद्वैतदर्शनम् अस्पर्शयोगत्वेन संस्तूयते आचार्यैः –

(३) अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः ।
अविवादोऽविरुद्धश्च देशितस्तं नमाम्यहम् ॥ का. ४-२.

अद्वैतदर्शनं ह्येतदद्वितीयानुभवलक्षणं ब्रह्मस्वभाव एवेत्यतः 'अस्पर्शः', द्वितीयसंबन्धरहितः । एष एव च मुख्यवृत्तेन 'योगः' वाद्यन्तरसंमतकादाचित्कसमाधिलक्षणयोगापेक्षया इत्यतः 'अस्पर्शयोग' उच्यते । 'वै नाम' इति ब्रह्मविदां तच्छब्दवाच्यत्वेन प्रसिद्ध इति द्योतयितुम् ; 'तत्केन कं पश्येत्' (बृ. ४-५-१५) इति श्रुतेः । 'सर्वसत्त्वसुखः' ; सर्वेष्वपि सत्त्वेषु सुखत्वेन विभाव्यमानः 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' (बृ. ४-३-३२) इति श्रुतेः । 'हितश्च' ; 'त्वमेव मे वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे' (कौ. ३-१), 'वक्ष्यामि हितकाम्यया' (गी. १०-१) इति श्रुतिस्मृतिभ्याम् ॥

अपि च 'अविवादोऽविरुद्धश्चायम्' । यथैव हि द्वैतस्पर्शाभावात् अस्पर्शयोगोऽयम् आनन्दस्वभावत्वादेव सर्वसत्त्वसुखः, एतत्प्राप्त्यैव नित्यतृप्त्यवाप्तेर्हितश्च – एवमेवास्मिन्नेवैकस्मिन् दर्शने विवादाभावः, यतोऽत्रैव न केनापि विरोधः । सर्ववाद्यात्मभूतत्वादस्य । न हि साङ्ख्यवैशेषिकादीनां बौद्धानां वा सर्वास्तित्वविज्ञानमात्रास्तित्वधर्मनैःस्वाभाव्यवादिभेदैः प्रविभक्तानां परस्परविरोधो परस्परेण विवादो वा जातु शाम्येतेति संभाव्यते । यद्यपि माध्यमिका अपि 'अस्तीति नास्तीति विवाद एष' (स. रा. ९-२८) इति । 'यद्यस्तित्वं प्रकृत्या स्यान्न भवेदस्य नास्तिता' (म. का. १५-८) । इत्यादिपठन्तः

सर्वदृष्टिप्रहाणादविवाद इति मन्यन्ते । तथापि तेषां विज्ञानवादादिभिर्विवादो दुर्वारण एव पदार्थस्वभावास्तित्ववादिभिः सर्वैरेव विरोधात् । तर्कमात्रावलम्बनेनेतरदृष्टिवारणे यतमानानां द्वितीयवादिसत्त्वभयस्यापरिहार्यत्वाच्च । यद्यपि विज्ञानवादिभिर्लोकोत्तरप्रज्ञाबाह्या विज्ञानव्यतिरिक्तविषयाभावदर्शनमविवादेन सिध्यतीत्यभिमन्यते, तथापि तदभ्युपगतसमाधेर्वैयक्तिकानुभवमात्रत्वात् तस्यापि बाधकानुभवसद्भावशङ्काभयं न निवार्यते । अद्वैतदर्शनलक्षणयोगे तु न तथा । भयहेतुभूतद्वितीयसद्भावशङ्काया अपि सार्वत्रिकानुभवानुसारियुक्त्या विनिवारणात् । तदुक्तमाचार्यैः –

(४) अस्पर्शयोगो वै नाम दुर्दर्शः सर्वयोगिभिः ।
योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः ॥ ३–३९.

इति । अत एव ह्यभियुक्ताः –

विवदत्स्वेव निक्षिप्य विरोधोद्भवकारणम् ।
तैः संरक्षितसद्बुद्धिः सुखं निर्वाति वेदवित् ॥

इति ॥

## ६५. विज्ञानवादतुलनोपसंहारः – तदयमत्र सारः –

(१) विज्ञानवादी जागरितावस्थाप्रतिबद्धविज्ञानमेव परीक्षणायोपादत्ते –

यदन्तर्ज्ञेयरूपं तु बहिर्वदवभासते ।
सोऽर्थो विज्ञानरूपत्वात् तत्प्रत्ययतयापि च ॥ आ. प. ६.

इति बाह्यपदार्थस्य परमार्थतोऽन्तरेवावस्थितत्वं मन्यते । आचार्यस्तु

चित्तं चेत्यं चेत्युभयमप्यन्योन्यापेक्षसिद्धमपि जागरिते व्यावहारिकं ज्ञानं ज्ञेयं चेत्युभयमप्यनुमन्यते –

(1) **उभे ह्यन्योन्यदृश्ये ते किं तदस्तीति चोच्यते ॥ का. ४-६७.**

(2) **सवस्तु सोपलम्भं च द्वयं लौकिकमिष्यते ॥ का. ४-८७.**

इति । विज्ञानतद्विषयोभयविलक्षणं तु परमार्थदृष्ट्या सर्वेषामप्यात्मनां स्वरूपभूतं ज्ञानं द्वितीयरहितमजं चेति तस्य मतम् –

(3) **अजेष्वजमसंक्रान्तं धर्मेषु ज्ञानमिष्यते ।**
**यतो न क्रमते ज्ञानमसङ्गं तेन कीर्तितम् ॥ का. ४-९६.**

(२) विज्ञानवादी जाग्रत्प्रत्यक्षमपि स्वप्नवदेव बाह्यार्थशून्यं विभ्रम इति मन्यते --

**प्रत्यक्षबुद्धिः स्वप्नादौ यदा सा च यदा तदा ।**
**न सोऽर्थो दृश्यते तस्य प्रत्यक्षत्वं कथं मतम् ॥ विं. १६.**

इति ब्रुवाणः । अर्थाभावश्च सुप्तप्रबुद्धेनेव लोकोत्तरविज्ञानेन निश्चीयत इति च । आचार्यः पुनः ‘ सवस्तु सोपलम्भं च ’ इत्यादिश्लोकोक्तविधया स्वप्नजागरितयोस्तत्तदवस्थोचितविज्ञानस्य बाह्यार्थतदाभासविषयत्वेपि लोकोत्तरसंज्ञितसुषुप्ते विज्ञानतद्विषययोरुभयोरपि सममेवाभावो विज्ञायते । येन च तदुभयं तदुभयाभावश्च विज्ञायते तदेव जिज्ञासोर्नित्यं सर्वज्ञस्वरूपं विज्ञानम् ; न तस्य स्वप्नः प्रबोधो वा, समाध्याद्यन्यापेक्षता वा । आत्मसत्यानुबोधेन तत्सतत्त्वं विजानतस्तदनुपपत्तेः–इत्याह –

(4) **अजमनिद्रमस्वप्नं प्रभातं भवति स्वयम् ।**
**सकृद्विभातो ह्येवैष धर्मो धातुस्वभावतः ॥ का. ४-८१.**

(5) अजमनिद्रमस्वप्नमनामकमरूपकम् ।
सकृद्विभातं सर्वज्ञं नोपचारः कथञ्चन ॥ का· ३-३६.

(३) विज्ञानवादिमते लोकोत्तरसमाधिप्रज्ञालाभेन जागरितावस्थातः प्रबोधः, स्वप्नादिव जागरितलाभेन । आचार्यमते तु अवस्थात्रयलक्षणान्मायास्वप्नात् प्रबोधः ; स च प्रबोधो न समाधिविशेषप्राप्त्या किं तु वेदान्ताभिज्ञाचार्योपदेशजन्यात्मसत्यानुबोधेन –

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ का· १-१६.

[ अत्र स्वप्नशब्देनैव जाग्रत्स्वप्नयोरुभयोरपि ग्रहणमिति भाष्यतः स्पष्टम् ॥ ]

अत्र हि 'अजमनिद्रमस्वप्नमद्वैतम्' इति कूटस्थैकस्वभावे निषिद्धसर्वविशेषे चैतन्ये अर्थाभासलक्षणा अशुद्धिर्वा, समाध्यादिप्रज्ञाया तदपनयलक्षणाशुद्धिर्वा नास्त्येव, अग्रहणलक्षणा बीजनिद्रा वा अन्यथाग्रहणलक्षणस्वप्ननिद्रा वा न जातुचिदपि विद्यते–इति बोध एवात्मसत्यानुबोध इत्युक्तम् ॥

६६. **बौद्धमतसाङ्कर्यनिरासोपसंहारः** – तदेवं जाग्रद्दृष्टिमात्रलब्धजीवितज्ञानज्ञेयविभागमूरीकृत्य तत्र विज्ञानव्यतिरिक्तबाह्यार्थतत्त्वं शुष्कतर्कावष्टम्भेनापह्नुवानो विज्ञानवादः, तयैव दृष्ट्या वितण्डाकथारीतिमात्राश्रयणेन सर्वदृष्टिनिरसनव्यसनी शून्यवादो वा सार्वत्रिकानुभवानुसारितर्काश्रयणेन द्वैतासत्यताप्रदर्शकेन वेदान्तिमतेन

न किञ्चित् साम्यमासादयितुमीष्टे इति सुस्फुटम् । तथा जाग्रदनुभवबाधितस्वप्नानुभववत् बाह्यार्थप्रज्ञा लौकिकी वैयक्तिकलोकोत्तरसमाधिप्रज्ञाबाधिता भविष्यतीत्याशासानो विज्ञानवादः, प्रतीत्यसमुत्पादाश्रयणेन सर्वधर्माणां नैःस्वाभाव्यसाधनेनैव चतुष्कोटिवर्जितप्रज्ञापारमितालक्षणमद्वयज्ञानं प्रसिध्यतीत्याशासानः शून्यवादो वा, अध्यारोपापवादन्यायेन नित्यनिर्विकल्पं स्वयंसिद्धमात्मतत्त्वमनुभवरूपं श्रुत्यनुसारेण विज्ञापयित्रा वेदान्तदर्शनेन स्वप्नेऽपि न कथञ्चित् तौल्यं भजेत – इति सोपपत्ति प्रदर्शितम् । अधिकं तु **माण्डूक्यरहस्यविवृतितस्तद्भूमिकातश्चा**धिगन्तव्यं जिज्ञासुभिः । सांप्रदायिकाद्वैतदर्शनस्याद्वैतदर्शनान्तरादिव सौगतदर्शनादपि वैलक्षण्यं श्रीगौडपादाचार्या अलातशान्तिप्रकरणारम्भे मङ्गलश्लोके निरदिक्षन् । तं च श्लोकं विज्ञानवादनिरसनप्रस्तावे उदाहृतमपि पुनरपि समुदाहृत्य किरणमिममुपसंहरिष्यामः –

**अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः ।**
**अविवादोऽविरुद्धश्च देशितस्तं नमाम्यहम् ॥ का· ४-२·**

[अत्र हि अद्वैतदर्शनयोगस्य नित्यसिद्धनिर्विकल्पानुभवरूपाद्वैतात्मनोऽभिन्नत्वात् स्वयंसिद्धकूटस्थानन्दरूपत्वम् , द्वितीयसंस्पर्शस्य सर्वथा सर्वदापि द्वितीयसंस्पर्शाभावात् विरोधविवादानास्पदत्वं च स्तुतिव्याजेन प्रतिज्ञातम् । न तु बाह्यमते इव वादिनां दृष्टौ दोषसद्भावमात्रमिति सुस्फुटम् ॥ ]

६७. **किरणोपसंहारः** – तदेवं प्राचीनप्रस्थानेभ्यो बाह्यप्रस्थानेभ्यश्च वैलक्षण्यं दर्शितं शुद्धशाङ्करप्रक्रियाप्रधानवेदान्तदर्शने एव

यथा मुमुक्षवो बद्धादराः स्युः । अथागामिकिरणेषु, अर्वाचीनवेदान्तप्रस्थानेभ्योऽपि यथा वैलक्षण्यमस्य प्रस्थानस्य तथा समुपपादयितुं यत्नः करिष्यत इति सर्वं शिवम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्यश्रीपूज्यपादश्रीमच्छङ्करभगवच्चरणस्मरण-परिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्येण सच्चिदानन्देन्द्र-सरस्वत्याख्येन भिक्षुणा प्रणीते शुद्धशाङ्करप्रक्रियाभास्कराभिधे प्रकरणे

**बौद्धमतसाम्यशङ्कापरिहारो नाम सप्तमः किरणः**

---

अध्यात्मप्रकाशमुद्रणालयः, होळेनरसीपुरम्. १०००, १६-८-१९६४.

*(continued from the inside of the front-cover)*

In the present instalment, an attempt has been made to show the superiority of this traditional method over the ones employed by the other schools in interpreting the Upanishadic teaching. Another special feature of this instalment is that the Absolutism of Vedanta has been compared and contrasted with that of the Mahayanic Systems, so as to effectively remove the baseless conclusion often drawn by modern scholars no less than by hostile Bhashyakaras that Gaudapada's Advaita is but Buddhism in disguise. Convincing arguments have been advanced here to show how the nature of the Absolute as described by Vedanta as well as the mode of approach to teach it, is altogether different and distinct from that accepted by the Mahayanists.

Each brochure in the series is purposely priced as low as possible so that it may be within the reach of all readers interested in the subject. The distribution of a limited number of copies among qualified sannyasins and pandits at the discretion of the Karyalaya is under contemplation. For this part of the publication, this has been rendered possible by the generous donation of **Sri Bhishagratnam, Ayurveda Vidwan B. V. Pandit, Sadvaidyasala, Nanjangud** – to whom our heartfelt thanks are due.

Holenarsipur
2-10-1964

*Y. NARASAPPA,*
*Chairman of the Working Committee,*
*Adhyatma Prakasha Karyalaya.*

## शुद्धशाङ्करप्रक्रियाप्रकाशकाः

# कतिचन वेदान्तग्रन्थाः

**ईशकेनकाठकमुण्डकोपनिषदः, तैत्तिरीयशीक्षावल्ली च** –

( सभाष्याः श्रीसच्चिदानन्देन्द्रसरस्वतीभिष्टिप्पणेनालङ्कृताश्च पृथक् पृथक् प्रकाशिताः ॥ )

**सुगमा** – अध्यासभाष्यस्य नवीनव्याख्या, सच्चिदानन्देन्द्रसरस्वतीभिर्विरचिता –

(वेदान्तप्रक्रियामार्गदर्शिनीयं व्याख्या । व्याख्यानभाष्यान्तरप्रस्थानविमर्शन-सहिता ॥ )

**माण्डूक्यरहस्यविवृतिः** – उपनिषदो गौडपादीयकारिकाणां च अभिनवा व्याख्या –

( कारिकारहस्यमुद्घाटितम् , विविधशङ्कापनोदनं च कृतं श्रीसच्चिदानन्देन्द्र-सरस्वतीभिरत्र ॥ )

**आनन्दवल्ली भृगुवल्ली च** – सभाष्या, सच्चिदानन्देन्द्रसरस्वतीकृतभाष्यार्थ-विमर्शिनीसहिता –

(भाष्यग्रन्थग्रन्थयो भिन्नाः, परमतशङ्काश्च परिहृताः श्रीचरणैरत्र ॥)

**वेदान्तप्रक्रियाप्रत्यभिज्ञा** – श्रीसच्चिदानन्देन्द्रसरस्वतीभिर्विरचितो निबन्धः –

(अध्यारोपापवादप्रक्रियैवैका सर्वत्र वेदान्तेषु परमार्थतत्त्वसमर्पणाय समादृतेति प्रतिष्ठापितमत्र । अतिप्राचीनकालादारभ्य सर्वज्ञात्ममुनिसमयपर्यन्तवृत्तवेदान्त-विचारेतिहासोऽपि प्रक्रियावैभवप्रदर्शनार्थं संगृहीतोऽत्र । शङ्करभाष्याभिप्रायं जिघृक्षूणामत्यन्तोपकारी ग्रन्थः ॥ )

**शुद्धशाङ्करप्रक्रियाभास्करः** – तत्र आद्यकिरणद्वयात्मकः प्रथमो भागः –

(वेदान्तसिद्धान्तनिर्णयः, शाङ्करसम्प्रदायनिर्णयश्च कृतोऽत्र ॥ )

**शुद्धशाङ्करप्रक्रियाभास्करः** – किरणत्रयात्मको द्वितीयो भागः –

(शाङ्करवेदान्तमर्यादा, शाङ्करवेदान्तप्रक्रियास्वरूपम् , अध्यारोपापवाद-प्रक्रियाविशेषाश्च संगृहीताः ॥)

सविवरणक्रेयपुस्तकपट्टिकाप्राप्तिस्थानम्

**अध्यात्मप्रकाशकार्यालयः, होळेनरसीपुरम्.**

(हासनजिल्ला, मैसूरुसंस्थानम् , दक्षिणरेल्वे.)